त्रेण॥ मध्यमपिंडप्राशनं॥ यदि पत्नी पुत्रकामा वेदाधत्तेति मंत्रेण॥ ऊर्ज्जं स्विधयो निषेकः॥ पिंडमूल्के
पिंडोद्धरणं॥ चरुस्थाल्यां अवघ्राणं॥ सकृद्दाक्षिणानामग्नौ प्रक्षेपः॥ उल्मुकस्य च॥ सव्यकरणं
उदकोपस्पर्शनं॥ यांतु मातृगणा इति मातृविसर्जनं॥ ततो दर्शश्राद्धं॥ तद्वत नित्यश्राद्धं वा॥ ब्राह्म
यज्ञः॥ हंतकारः॥ देवतानैवेद्यं बलिहरणं निवापसादिनां॥ ततो भोजनमिति॥ आधानानंतरं प्र
थमामावास्यायां भवेदिदं॥ प्रातर्होमे कृते तस्याः खरादग्निसमुद्धरेत्॥ पश्चात्कद्वयं कार्यं नांदीदर्शार्थमेव
वो नित्यं निर्णिजनां तस्यां मातरो नांदिकं ततः॥ उपविश्य सपत्नीकः प्राङ्मुखो गृह्य परेणत्त्वं॥ प्राणाया
मत्रयं कृत्वा ततो दक्षिणादिङ्मुखः॥ उपविश्योत्तरेणाग्नेरपसव्यं करोत्स थः॥ ३॥ नीवीबंधं स्मरन्का
लं संकल्पश्चाविकल्पकः॥ ऋष्यादिस्मरणं कार्यं देवताभिहितिस्तथा॥ ४॥ परिस्तरणमग्नेश्च पा
त्रासादनमेव च॥ चरुपात्रं जलं चाज्यमेतेषां वज्रपात्रकं॥ ५॥ सकृदाछिन्नदर्भाश्च तंडुलाः स्रुवे
तं तथा॥ गृहस्थीया चरुपात्रीं तां स्वतंडुलां हासेचनं॥ अधिश्रित्य श्रपेद्देवमभिघार्य्य द्वासनं चाराः॥ ऊनु

मन्वाद्यसव्यंवमेहृत्वेनजुहोतिव॥७॥आकृतीमेहृतां प्राशयेच्छेषमाकरणमुन्मुकं॥अवनिउपवलेखायां
सकृदाछिन्नसंस्तृतिः॥८॥पिंडदानंजपोत्रेतित्युदंगस्तसुधारणात्॥आद्यैत्रामीमदंतेतिजप्त्वाभूयोव
नेजनं॥९॥नीवीविस्रंसनंकुर्यात्दंजलीनुषड्ढ्दृतांनुजपेत्॥एतद्वइतिसूत्रात्॥ऊर्जंवोओमितिक्षिपेत्॥
१०॥पिंडानुद्धृत्यपात्रेतानवजिघ्रेत्स्वयंप्रभुः॥अतएवप्रवासादोअवघ्राणंविलुप्यते॥११॥सकृदाछिन्न
दर्भाग्निप्राश्येदग्नोतथोल्मुकं॥रूचाप्रव्यंस्त्वेदंबुंविसृजेन्मातृकंगणं॥१२॥दृष्टश्राद्धंनतिलंव्रं
16 ब्रह्मयज्ञोष्मृहंततिः॥नैवेद्यं बलिदानानिभोजनंचत्र्ययंक्रमः॥१३॥मातरोनांदिकंश्राद्धंतथामातृवि
सर्जनं॥प्रयोगप्रथमेचैतत्रिनयंतपुनःक्वचित्॥१४॥पिंडपितृयज्ञोस्मामावास्यायांमुख्यकालः॥नगौण
कालोस्ति॥अतस्त्वमावास्यायांतदकरणेवैश्वानरचरुःप्रायश्चित्तं॥नकालांतरेकरणं॥ ॥इतिपिंडपि
तृयज्ञः समाप्तः॥ ॥अथनवान्नप्राशनं॥तच्चशरद्वसंतयोर्नवस्यचनिष्पत्तौवा॥शरदिव्रीहीणां
वसंतेयवानां॥तच्चैतानिनक्षत्राणिरेवतीअश्विनीरोहिणीमृगशिरःपुनर्वसुपुष्यंचहस्तचि १६
त्राचश्रवणधनिष्ठोत्तरात्रयं॥बुधेरावौगुरौभृगौकेगंड॥रिक्तातिथिव्यतीपातवैधृ
ति॥विष्टिकरणं॥संक्रांतिः॥अवमादिनं॥अन्यच्चविरुद्धंवर्जयित्वाकार्यं

तत्रप्रथमप्रयोगेमुहूर्त्तेदिने प्रातर्होमेकृतेस्वस्थानादग्नेर्देवापदेशेमहानसेकृचापाकःका
र्यः॥ माध्याह्निकेनित्यकर्मनिर्वर्तितेनातंकृत्वाब्राह्मणपादप्रक्षालनं॥ उपवेशनं॥ प्राणायाम
त्रयंकालज्ञानंचगोत्रपितृनामसंकीर्तनं॥ यजूंवानवान्नकर्मारंभनिमित्तमाभ्युदयिकश्रा
द्धंमातृपूजनपूर्वकमहंकरिष्ये॥ मातृपूजनंचश्राद्धंचकृत्वा॥ पत्न्यासहपश्चादग्नेरुप
विश्य॥ प्राणायामत्रयंकालज्ञानंचकृत्वा॥ परमेश्वरप्रीतयेनवान्नप्राशनमहंकरिष्ये॥
तत्रपूर्वेणब्रह्मणागमनं॥ अग्रेरुत्तरतःपात्रासादनं॥ पवित्रेद्वे॥ मन्मयीआज्यस्था
ली॥ मत्ताम्रमयीचरुस्थाली॥ पालाश्यःसमिधःप्रोक्षावाघारौ॥ समिद्भूतमेआज्यभागौ
अग्निःप्रथमः प्राश्नाविति संस्रवप्राशनेमंत्रः॥ वरोदक्षिणा॥ एतान्वैकल्पिकान्यदा
यानदंकरिष्ये॥ ग्रतासुधायेतिचत्वारःपथ्यामोदेवयानाइतिद्वयोर्मन्त्रयोःपरमेष्ठी
प्रजापतिऋषिःत्रिष्टुप्छंदःप्रथमस्येन्द्रोदेवताद्वितीयस्यसर्वोदेवादेवताआज्यहोमेविं॥
स्विष्टमग्नइतिमंत्रस्यप्रजापतिऋषिःत्रिं अग्निदेवताआज्यहोमेविं॥ अन्नुबस्य
स्याप्ताकान्वीहिभिर्मारिवांपवनाग्रयणात्पुरा॥ नप्रुंजितेतिविस्पष्टंयज्ञपार्श्वेनिरूपितं॥१॥
दद्येवंब्राह्मणेभ्यश्चकृत्वाचाविश्वदैविकं॥ अन्नंनवान्नमश्नीयादितिबौधायनश्रुतिः॥२॥

रितिमहाव्याहृती नां प्रजापतिरृषिः गायत्र्युष्णिगनुष्टुप्छंदांसि अग्निवायुसूर्या देव
ता॥ आधाने वि०॥ चंन्नः सचन्नमयाश्चाग्नेयते त्रा तिमितिमंत्राणां वामदेव ऋषिः त्रि०
अग्निवरुणौ देवते प्रथमयोः सौत्रामंाय वन्थे वि०॥ तृतीयस्याग्निर्देवता चतुर्थस्य
वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता अनादिष्टहो०॥ उदुत्तमामिति शुनःशे
17 पऋषिः त्रि० वरुणो देवता प्रायश्चित्ते नाम्ना होके०॥ व्रीह्याग्रयणे मंत्रः अग्निः प्रथमः प्राश्नाचितिमंत्रस्यान्नपत
न्नस्य नोदेहीतिमंत्रयोः परमेष्ठी प्रजापतिरृषिः आद्यामंत्रो यजुः अग्निर्देवता संस्त्रवप्रा० द्विती
यस्य बृहती छंदः अन्नं देवता वयनेसमिदाधाने वि०॥ यवाग्रयणे एतमु त्यमितिमंत्रस्य प्रजापति०
ज० लिंगोक्ता देवता यवसंस्त्रवप्रा०॥ तत्र प्रजापतिं॥ इंद्रं॥ अग्निं॥ सोमं॥ इंद्रं॥ सर्वदेवान्॥ एता दे
वता आज्येन॥ इंद्राग्नी विश्वांदेवान् द्यावापृथिव्यौ॥ एताः प्रधाना देवताः नवव्रीहिम
येन स्थालीपाकेन यवमयेन वा॥ अग्निं आज्येन॥ अग्निं स्विष्टकृतं चरुशेषेण॥ अग्निं॥ वायुं॥ सूर्यं॥
अग्निवरुणौ॥ २॥ अग्निं वरुणांसवितारं विष्णुं विश्वांदेवान् मरुतः स्वर्कान्॥ वरुणं प्रजापतिं॥ एता

देवता आज्येन॥ एता अंगप्रधाना। थदेवता॥ अस्मिंन्कर्मणि पस्तंयक्ष्ये॥ ब्रह्मवरणं॥ प्रणीताप्रणयनं॥ परिस्तर
णं॥ पात्रासादनं॥ पवित्रकरणं॥ प्रोक्षणीसंस्कारः पात्रप्रोक्षणं॥ प्रोक्षणीनिधानं॥ आज्यनिर्वापः॥ प्र
मणि कोदकेन चरुपात्रे तंडुलप्रक्षेपः॥ आज्याधिश्रायणं॥ चरोश्चद्वयोः पर्यग्निकरणं॥ चरोः श्रपणं
स्रुवप्रतपनं॥ संमार्गकुशैः संमार्जनं॥ प्रणीतोदकेनाभ्युक्षणं॥ पुनः प्रतपनं॥ निधानं॥ उत्तयोरुद्वासनं॥
आज्योत्पवनं॥ अवेक्षणं॥ अपद्रव्यनिरसनं॥ प्रोक्षण्याः प्रत्युत्पवनं॥ उपयमनकुशादाय समि
धोभ्याधाय॥ प्रोक्षण्युदकेन सपवित्रेणाग्नेः पर्युक्षणं॥ पवित्रयोः प्रणीतानिधानं॥ दक्षिणजानुनि सु०२
पातः ब्रह्मणान्वारब्धः स्रुवेण होमः॥ आज्येन षडाहुतयः॥ ॐ प्रजापतये स्वाहा॥ इदं०॥ ॐ इन्द्राय स्वाहा॥ इ
दं०॥ ॐ अग्नये स्वाहा॥ इदं०॥ ॐ सोमाय स्वाहा॥ इदं०॥ ॐ शतायुधाय शतवीर्याय शतोतयेभिमातिषाहे॥
शतं यो नः शरदो अजीजानिंद्रो नेषदति दुरितानि विश्वा स्वाहा॥ इदमिंद्राय न मम॥ ये चत्वारः पथयो देव
याना अंतरा द्यावापृथिवी वियंति॥ तेषां यो अज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहा॥
इदं सर्वेभ्यो देवेभ्यो न मम॥ ततः स्थालीपाकेनाभिघार्य स्रुवेण तिस्र आहुतयः॥ ॐ इंद्राग्निभ्यां स्वा
हा॥ इदमिंद्रा०॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा॥ इदं विश्वे०॥ ॐ द्यावापृथिवीभ्यां स्वाहा॥ इदं द्यावापृथि०॥

उपांशु

ततस्त्वाज्याहुतिः॥ ॐ स्विष्टमग्ने अभितत्पृणीहि विश्वांश्च देवः पृतना अभिष्यक् (तु) ॥ सुगं नु पंथां प्रदिशं न एहि
ज्योतिष्मध्येह्यजरं न आयुः स्वाहा॥ इदमग्नये॥ स्थालीपाकेन स्विष्टकृत्॥ ॐ अग्नये स्विष्टकृते स्वाहा॥
इदम॰॥ ततो दशाज्याहुतयः॥ ॐ स्विष्टमग्ने अभितत्पृणीहि विश्वांश्च देवः पृतनाभिष्यक्॥ पुनः सुगं नु तु
पंथां॰ आयुः स्वाहा॥ अग्नये॰॥ ॐ भूः स्वाहा॥ इदमग्न॰॥ ॐ भुवः स्वाहा॥ इदं वायवे॥ ॐ स्वः स्वाहा॥ —
इदं सूर्याय॥ ॐ त्वं नः॥ इदमग्नीवरुणाभ्यां न मम॥ ॐ स त्वं नः॥ इदमग्नीवरुणाभ्यां न मम॥ ॐ अया
श्चाग्ने॥ इदमग्नये॥ ॐ ये ते शतं॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्य
श्च न मम॥ उदुत्तमं॥ इदं वरुणाय॥ प्रजापतये स्वाहा॥ इदं॰॥ ततः संस्रवप्राशनमनेन मंत्रेण॥
ॐ अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः। शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्ष
णिर्ब्राह्मणश्रेयः समानिषदना स्वरयाव से [ ] समाना मरिशास नो मयोऽन्नः पिता आ 18 ११
विशास्वत्रां तोकाय तन्वे स्योनः॥ अन्नपतेन्नस्य नो देहीति वा॥ यव संस्रवप्राश
न त्वं न्यो मंत्रः॥ एतमु त्यं मधुना संयुतं यवं सरस्वत्या अधि मनावचर्कृषुः॥ इंद्र आ
सीत्सीरपतिः॥ शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति॥ मार्ज्जनं पवित्रप्रतिपत्तिः॥

18

ब्रह्मणो वरदानं॥ ब्रह्मन् अस्य नवान्नप्राशन कर्मांगतया विहितो वरः प्रतिगृह्यतां॥ ॐ स्वेति ब्रह्मणो का
प्रीतिता विमोकः॥ अनुच्छिष्ट पाकेन ब्राह्मण भोजनं॥ ब्राह्मणास्य नवान्न कर्मांगतया विहितं॥ साधनीभू
तं मन्नं दत्तं दास्यमानं वा स्वेदः अमृतरूपेण संपद्यतां॥ इदं ब्राह्मणाय॥ न मम॥ एतच्च नवान्न कर्म यदि
दिकथं चित्स्वकालेन संभवति॥ तदापि गौणोपि कार्यः॥ इति गौणः॥ व्रीह्याग्रयणं शरदि चेन्न संभ
वति॥ तदा यवाग्रयणात्पुरा अनादिष्टं कृत्वा कर्तव्यं॥ यवाग्रयणं वसंते चेन्न संभवति॥ तदा व्रीह्याग्र
यणात्पुरा अनादिष्टं कृत्वा कार्यं॥ तदापि चेन्न संभवति तदा लोपः॥ पौलोप्रायश्चित्तं॥ तथैव द्वयोः यवाग्रयण
स्य व्रीह्याग्रयणस्य वा एकस्य लोपे उपवासो नादिष्ट पूर्वः प्रायश्चित्तं॥ आग्रयण द्वयस्य लोपे त्वग
यतं त्रुमते चरुः कार्यः॥ आग्रयणक्रियायाः पूर्वं धान्यमात्रस्य नवस्य यद्वा व्रीह्याग्रयणाच्छ्यामाक ध
नीवारयव वेणुयव शालि मुद्ग गोधूम कंगूनां वा॥ अथवा व्रीह्याग्रयणे व्रीहीणां॥ यवाग्रयणे यवा
नां॥ नूतनानामन्नानां पचेदं [illegible] त्यो भोजनं प्रतिषिद्धं॥ तत्पचनं भोजनं च यदि विस्मृत्यादिना क्रियते तदा अग्नये वै
श्वानराय चरुः कर्तव्यः॥ आहो अनादिष्टं तच्च कार्यं॥ नूतन व्रीहीणाम भावे नूतन शालिभिः कार्यं॥ नूत

न्यवानामभावेऽन्नतनैर्गोक्षुमैः कर्त्तव्यं। आग्रयणानुष्ठानादौ धीमायुर्नेवान्नभोजनयोग्यतावि
शिष्टतोकं भगिनापरमेश्वरस्त्रीतिश्च जायते॥ ततो नुष्ठयामिति। वसंते वा शरत्स्वेव नवान्नप्राशनं
भवेत्। बुधेन्दुगौरवे वा पि वारे स्यादन्यतो न च। रेवत्यां वा तथाश्विन्यां रोहिण्यां मृगशीर्षके। पुनर्व
सौ तथा पुष्ये हस्ते चोत्तरात्रये। २। श्रवणे च धनिष्ठायां एतत् इष्यते नान्यतः। रिक्तां तिथिं व्यतीपातं वैधृ
तिं च वर्जयेद्दिने। ३। संक्रान्तिकरणाविष्टिं विरुद्धं तद्विवर्जयेत्। जन्मर्क्षे च तृतीये च पंचमे नवमे पि च
19 । ४। दशमे कादशे षष्ठे चन्द्रे चैतत्प्रशस्यते। प्रथमप्रयोगे सप्रातर्होमि कृते सति। गृह्याग्निं पचेदन्नं
ब्राह्मणेनाग्नि मंत्रेण। ५। निर्णिजिनांतं कुर्वीत नैमित्तिकं कर्म वा त्रवै। मातृपूजा ततः श्राद्धं संकल्प्याय
विकल्पकः। ६। सप्यादि स्मरणं कृत्वा देवताभिहितं सतः। ब्रह्मवरणादिकं कुर्यात् स्वाज्यभागान
मंत्रतः॥ ७॥ शतायुधेति मंत्रेण आज्याहुति द्वयं भवेत्। इन्द्राग्निभ्यामिमा स्मि स्वष्टकृणेज्याहुतिस्त १९
तः॥ ८॥ स्विष्टमग्नेव मंत्रेण वरुणाः स्विष्टकृत्पुनः। स्विष्टमग्नेव मंत्रेण भूराद्या आहुतीर्नव॥ ९कृत्वाग्नि

अग्निमानधिकारी ह नेतरः कर्कसम्मतिः॥ सम्यगध्ययने सोपि प्रवृत्तस्तस्य सा क्रिया॥१॥ समाचारपरिप्रा
प्तां कुर्याद्व्यजनक्रियां॥ ततो नान्दीमुखं श्राद्धं मातृपूजनपूर्वकं॥२॥

रिति मंत्रेणासंस्रवप्राशनं॥ त्विद्धां मार्जनादि च सर्वेस्या मातॄणां च विसर्जनं॥१०॥ इति प्रयोगपद्धतौ
नवान्नप्राशनं॥ ॥ अथोपाकर्म्म। तच्च श्रावणपौर्णमास्यां श्रावणस्य शुक्लपंचम्यां वा कर्त्तव्यं। यदा
एकस्मिन्वर्षे उपाकर्म्म श्रवणाकर्म्मणोरारंभः क्रियते तदा प्रथमप्रयोगे श्रवणाकर्म्म श्रावण्यां।
तस्यैव मासु पाकर्म्मैव विहीयमानकालांतरत्वात्। द्वितीयादिप्रयोगे श्रावण्यां पौर्णमास्यामनु
क्रमेणोपाकर्म्म श्रवणाकर्म्मणी द्वे अपि कर्त्तव्ये। उपाकर्म्मान्तरकालं मंत्रब्राह्मणयोरध्ययनं
पौषमासस्य यावन्मध्यमाष्टका। रोहिणी नक्षत्रं वा प्राप्नोति। तत्र मध्यमाष्टकायां रोहिण्यां
वाऽधीयमानयोर्मंत्रब्राह्मणयोरुत्सर्गः। पौषस्य रोहिण्यां मध्यमायां वाष्टकायामध्या
यानुत्सृजेयुरित्यनेन सूत्रेण कर्त्तव्यः। तदूर्ध्वं शुक्लपक्षेषु मंत्रब्राह्मणयोरध्ययनं कार्यं।
कृष्णपक्षे षडंगानां। यावदाषाढकृष्णदशमी। श्रावणकृष्णदशमी वा गताः। तत्रोत्सर्गः। अ
र्द्धषष्ठान्मासानधीत्योत्सृजेयुरर्द्धसप्तमान्वेत्यनेन सूत्रेण विहितः। कार्यः। अपरे तु। एकस्मि

वोत्सर्गस्य कालचतुष्टयं मन्यन्ते सत्र क्रमभंगात्तन्नोत्सर्गद्वयं तद्दित्तकर्मान्त्रितयं। कालत्रयं साध्यं
तत्रापि सांप्रतं केनचित्कारणेन श्रावणपामे वा क्रियते तत्र हा सिद्धा। यतो तत्र प्रथम प्रयोगे श्रावणपं
पौर्णिमास्यां तत्तांत्रम्यां वा प्रातर्होमं कृते त्रिसु ष्टत्यपाकः कार्यः। निर्णिज्य जनातां तम श्याद्धिकं कृत्वा
श्राद्धं तत्रा राघे कस्मिन्न्वर्षेणु रौरावस्तथा श्यनप्ता त्रादेशिष्यस्य व्रातवंक्षम तथापि तु गुरोरे-
श्रा वंद्धौ। तत्र पादप्रक्षालनं। ब्राह्मणानां उपवेशनं। प्राणायामत्रयं कालस्नानं च कृत्वा। गोत्रपितृ
नामसंकीर्तनं च॥ अद्या योत्सर्गोपाकर्मणो निमित्तमात्सुदपि के श्राद्धे मातृपूजनपूर्वकम
हं करिष्ये। ततो मातृपूजनं श्राद्धं कृत्वा। त्र्यकं न्नतातिलदर्भहर्वीपामार्गगोमयमृत्तिकात्त ष्यर्घ्य
20 गंधपुष्पधूपदीपाच्छादनसूत्र यज्ञोपवीत नैवेद्यतांबुलानि गृहीत्वा ग्रामादुदक्शिष्यैः सहै
वी ब्राह्मणैः सह रम्यं जलाशयं गत्वा। ततस्तीरे स्थण्डिलं तत्र मृत्तादिकं विन्यस्य यथोक्तं शौ १०
चं कृत्वा। ततः सर्वे यज्ञोपवीतिनो बद्धत्रिकच्छाशिखादर्भपाणयो गुरुशिष्या अप्रादुर्खो

पविश्यप्राणायामत्रयंकातज्ञानेवकृत्वाछेद्दसामुत्सर्गमहंकरिष्ये। इतिसंकल्पंकुर्युः। सर्वसहैमा
सृत्येगुरुशिष्यैःसरस्यानिधार्मिणा। विसृष्टस्यानिसृजामहे। ततः। शिष्याः गुरुमसिवाद्ययथावृद्ध
माभिवादयेयुः। ततः स्नानेयथोक्तं। ऋषिपूजनं। विसर्जनं। अतऊर्ध्वंपरस्परमभिरोधयेयुः॥ नि
यमेनसर्वेषांगुरुग्रहेत्रिरात्रंवसनं। ततोयथेष्टगमनं। एतावानयमुत्सर्गः। यस्त्वर्द्धषष्ठा
न्मासानित्रोक्तौ। यदीउपाकर्म्मकालेऽक्रियतो तदाशक्तौ स्नानादितेत्रोऽणप्राणायामत्रयंका
लज्ञानेवकृत्वा। तत्रस्नानप्रयोगः। एवंतिशिष्टेकालेऽध्यायोत्सर्गोपाकर्म्मनिमित्तंस्नानम
हंकरिष्ये। ततः ॐ ह्रीं पुंडरीकाक्षमंत्रेण। यतेशतमित्यावर्त्तनं। सुमित्रियानइत्यपोऽञ्जलि
नादानं। दुर्मित्रियानइतिनिषेकः। ततोमृदादिवारिणाचकषायादिगात्रक्षालनं। आचमनं।
नमस्कारः। इदंविष्णुरितिमृत्स्नानं। आपोअस्मानितिनिमज्जनं। उदिदाभ्यइत्युन्मज्जनं। मान
स्तोकइतिगोमयस्नानं। इमंमेवरुणेत्यादिमंत्रैरभिषेकः। निमज्जनं। अपाघइत्यपामार्ग

पाकनं। कांडादिति द्वीभि। आपोहिष्ठेत्यादि तिसृभिर्मंत्रैर्दर्भैर्भ्य। द्वाविंशति निमार्जनं। अघमर्षणं।
स्नानांगतर्पणं संध्यादि नित्यकर्म समापनं। ततः शोतिपाठपूर्वं सप्तर्षीनृक्षसु। स्थाप्य मेवं। क
श्यपः। भारद्वाजः। आंगिरसः। गौतमः। वत्सः। पराशरः। मांडव्याः। एते सप्तर्षयो दर्भपवित्रैर्वि
21 मिश्रितैर्भिः। सावित्र्यंग्रेभ्यः। कार्याः। तत स्नात्वा गंगाम्बुना दर्शयित्वा स्थापयेत्। तद्यथा। भूर्भुवः स्वः
काश्यपे आवाहयामि।। स्थापयामि। कश्यपाय नमः। एवं भरद्वाज। आंगिरसे। गौतमे। वत्से। पराश
रे मांडव्ये आवाहयामीति समानं। ततो मत्तोज्यति रिति मंत्रेण सप्तर्षीणां प्रतिष्ठापनं। तत
इमा वेच गोतम भरद्वाजा विश्वामित्रैः सर्वेषां पठनं। ततः प्राणायाममंत्रयं। कालज्ञानेन कृत्वा। अस्या
योस्मिन् पाकर्म निमित्ते सप्तर्षीपूजनमहं करिष्ये। सप्तर्षयः प्रतिष्ठिताः शशी रोहिणी विष्णुर्विचक्र
मे। इति मंत्रद्वयं समुच्चार्य। कश्यप भरद्वाज आंगिरस गौतम वत्स पराशर मांडव्याः इहेवं दद्
प्रतिगृह्यतां। एवं मेव पुष्प धूप दीपाच्छादनं यज्ञोपवीतं नैवेद्यं तांबूलानि। ततः पूजा निवेदनं। २१

तद्यथा॥ कश्यपभरद्वाजांगिरसगौतमवत्सपराशरमांडव्येभ्यः गंधपुष्पधूपदीपाछादनयज्ञोपवीतनैवेद्य
तांबूलानि संपद्यंतां॥ एवमेव स्वकीयऋषिपूजनं॥ ततः पितृभ्यो यज्ञोपवीतदानं तद्यथा प्राचीनावी
ती दक्षिणाभिमुखः सतिलोदकेन गृहीत्वा पुरतो यज्ञोपवीतानि धाय॥ काश्यपसगोत्रेभ्यः अस्मत्पितृपिताम
हप्रपितामहेभ्यः अमुकामुकशर्मभ्यः गोत्रेभ्यः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः अमुका
मुकशर्मभ्यः इमानि यज्ञोपवीतानि संपद्यंतां॥ सर्वे ब्राह्मणाश्चंदनानुलेपनतांबूलदानपूर्वकं परस्परं
पितृकल्पितान्निर्दिशुः॥ ततउत्सर्गतर्पणं च यवैरंजलिना दक्षिणं जान्वाच्य देवास्तृप्यंतु॥ छंदांसि तृप्यं
तु॥ वेदास्तृप्यंतु॥ ऋषयस्तृप्यंतु॥ पुराणाचार्यास्तृप्यंतु॥ गंधर्वास्तृप्यंतु॥ इतराचार्यास्तृप्यंतु॥ संवत्सर
सावयवस्तृप्यंतु॥ पितरस्तृप्यंतु॥ आचार्यास्तृप्यंतु॥ ततो दक्षिणाभिमुखः प्राचीनावीती नः सव्यं जान्वाच्य
केवलं जलमंजलिना गृहीत्वा गोत्राः॥ अस्मत्पितरः अमुकशर्माणः तृप्यंतु॥ गोत्राः अस्मत्पितामहाः अ
मुकशर्माणस्तृप्यंतु गोत्राः अस्मत्प्रपितामहाः अमुकशर्माणस्तृप्यंतु॥ उदीरतामित्यादि यथोक्तं

तर्प्पणंविधिनाहरहःक्रियमाणेनपित्रादीन्सर्वानपि इहतर्प्पयेयुरितिकेचित्। येजीवपितृकाःसेवपुत्रायेचप्रि
घ्यास्तेआचार्यायतित्वंतर्प्पयेयुः। यथागोत्राः अस्मदाचार्यपितरः अमुकशर्म्माणस्तृप्यंतु। गोत्राः अस्मदा
चार्यपितामहाः अमुकशर्म्माणस्तृप्यंतु। गोत्राः अस्मदाचार्यप्रपितामहाः अमुकशर्म्माणस्तृप्यंतु। तत
आचमनं। ततोवंशानामुच्चारणं। वंशस्यांतेवंशोक्तानामेषयस्तृप्यंतु॥ इतिवंशोक्तानामृषीणांतर्प्पणं। तत
स्सावित्रीर्यासायस्याविद्याश्चतुःकृत्वोनुब्रुवाणंसर्वेषांतर्द्दोतिविरताःस्मइतिसत्ववतु॥ ततोमंत्रब्राह्म
22 णयोरध्ययनादिक्रंतपकंठिकाफलिकापर्यंतेभ्यःपठनेसर्वेषांतदेतदृचाभ्यक्तमित्यतस्यऋषीन्नमस्कृत्य
उत्तिष्ठब्रह्मणस्पतेतिविसर्जनं। समुद्रंगच्छेतिमंत्रेणजलाशयेप्लावयेत्। ततोद्विराचमनं। गृहागमनं। पा
दौप्रक्षाल्यआवसथ्याग्नेःपश्चात्पत्न्याशिष्यैश्चसहप्राङ्मुखउपविश्य। आवसथ्येनकर्परमधिश्रित्य — २२
यवान्प्रक्षिप्यकर्परस्याधःप्रज्वाल्ययवानांभर्जनं। तेयवाधानाः। गुरुप्राणायामत्रयंकालज्ञानंचकृ ४
त्वा। उपाकर्म्माहंकरिष्ये। तत्रपौर्णमास्यामुपाकर्मेत्यत्रग्रणपात्रासादनं। पवित्रेद्वे। मृन्मयीआज्य

स्थाली पात्राश्च समिधः प्रोक्षाज्याघारौ। समिद्धतमेत्याज्यभागौ॥ तिलहोमः सावित्री मंत्रेण। वरो दक्षिणा॥ त्रि
रात्रं तो मन रवानि कृतनो एत। त्रैकाल्यिकान्यद्दार्थान हेकरिष्यो। तत्र उपाकर्म मंत्राणं प्रजापतये स्वाहेत्येवं
माद्यमनुमतये स्वाहेत्येव मंत्राना प्रजापतिऋषिः। तिस्रश्छंदो हीनालिंगोक्ता देवता होमे विनियोगः। सदस
स्पतिमिति मंत्रास्य स्वपेत ब्रह्मा ऋषिः गायत्री छंदः। सदस्पतिर्देवता। अन्नाहोमे विनियोगः। सदस
समिया होमे विनियोगः। शंन्नो भवंतु वाजिन इति मंत्रस्य वसिष्ठ ऋषिः। वाजिनो देवताः। वाजिनयागे वि
नियोगः। दधिक्राव्ण इति मंत्रस्य वामदेव ऋषिः। अनुष्टुप्छंदः सुरभीर्देवता। दधिद्रप्स भक्षणे विनि
योगः। भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापति ऋषिः क्रमेण गायत्र्युष्णिगनुष्टुप्छंदांसि। अग्निवा
युसूर्या देवता। आधाने विनियोगः। त्वंनो अग्ने सत्वन्नो अग्ने अयाश्चाग्ने। येते शतमिति मंत्राणां वाम
देव ऋषिः त्रिष्टुप्छंदः। अग्निवरुणौ देवते। प्रथमयोः सोत्रा माणा विनियोगः। तृतीयस्याग्निर्देवता। च
तुर्थस्य वरुण सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः। अन्नादि होमे विनियोगः। उदुत्तममिति

मंत्रस्य शुनःशेप ऋषिः। त्रिष्टुप् छंदः। वरुणो देवता। पाशान्मोके विनियोगः। सह नो स्तु सह नो वत्विति मंत्रस्य
ब्रह्मा ऋषिः। सर्व यजु ब्रह्मा देवता जपे विनियोगः। तत्र ओं तामग्निं वायुं ब्रह्माणं छंदांसि प्रजापतिं देवान् ऋ
षीन् श्रद्धां मेधां सदसस्पतिं। अनुमतिं। आज्येन। यजुर्वेदे क्षीयमाने। पृथिवीं। अग्निं ब्रह्माणं छंदांसि। प्रजा
पतिं। आज्येना [illegible] देवान्। ऋषीन्। श्रद्धां मेधां सदसस्पतिं। अनुमतिं। सामवेदे क्षी
यमाने। दिवं सूर्यं। ब्रह्माणं। छंदांसि। प्रजापतिं देवान्। ऋषीन् श्रद्धां। मेधां। सदसस्पतिं। अनुमतिं। अ
थर्ववेदस्योपाकर्म्मणि दिशः। चंद्रमसं। ब्रह्माणं। छंदांसि। प्रजापतिं देवान्। ऋषीन्। श्रद्धां। मेधां। स
दसस्पतिं। अनुमतिं। अथर्ववेदस्योपाकर्म्मणि। सर्वत्र एतमपि वेदानां अध्ययन कालेतु यपद्रुपा
कर्म्मणि। पृथिवीं। अग्निं। ब्रह्माणं। छंदांसि प्रजापतिं। देवान्। श्रद्धां। मेधां। सदसस्पतिं। अनुमतिं। एत
त्प्रधान देवता। आज्येन। सदसस्पतिं धानाभिः सावित्रां तिलैः अत्र यज्ञो अनुकर्षणेन अस्मिन्
उपाकर्म्मणि त्वं ब्रह्मा भव इति ब्रह्मवरणं। प्रणीताप्रणयनं। परिस्तरणं। पात्रासादनं। पवित्र छेदना
दर्भाः। स्रुवः। इध्मः। समिधः। स्रुवः। आज्यं धानाः। चरुस्थाली। अन्योपकल्पनीयानि। प्रतिशिष्यं नवनव

23

२३
५

सासिम्रुश्रार्द्रेडीः। सपत्रा। उडुंबरस्या दर्विमद्धार्थेध्मना। आकर्पफिकनकौ। तिलाश्चतौ पवित्रकरणं। श्री प्रो
क्षणीसंस्कारः। पात्रप्रोक्षणं। असंचरेत्प्रोक्षणीनिधानं। आज्यनिर्वपः। आज्याधिश्रपणं। पर्यग्निकरणं।
स्रुवः प्रतपनं। संमार्गकुशैः स्रुवः संमार्गः। त्यागीतोदकेनाभ्युक्षणं। पुनः प्रतपनं। दर्भेण निधानं। आज्योद्वा
सनं। उत्पवनं। अवेक्षणं। अपद्रव्यनिरसनं। प्रोक्षणीमां पात्रमुत्पवनं। उपयमनकुशादानं। समिदाधानं।
प्रोक्षणमुदकेन सपवित्रेण हस्तेन पर्युक्षणं। दक्षिणजानुनिपातः। ब्रह्मणान्वारंभः। स्रुवेण होमः। प्रजाप
तये स्वाहा। इदं प्रजापतये। इंद्राय स्वाहा। इदमिंद्राय। अग्नये स्वाहा। इदमग्नये। सोमाय स्वाहा। इदं सोमाय।
ऋग्वेदं दीक्षीयमाणो पृथिव्यै स्वाहा। इदं पृथिव्यै। अग्नये स्वाहा। इदमग्नये। ब्रह्मणे स्वाहा। इदं ब्रह्मणे। छंदो
भ्यः स्वाहा। इदं छंदोभ्यः। प्रजापतये स्वाहा। इदं प्रजापतये। देवेभ्यः स्वाहा। इदं देवेभ्यः। ऋषिभ्यः स्वाहा।
इदं ऋषिभ्यः। श्रद्धायै स्वाहा। इदं श्रद्धायै। मेधायै स्वाहा। इदं मेधायै। सदसस्पतये स्वाहा। इदं सद
सस्पतये। अनुमतये स्वाहा। इदमनुमतये। एताः पंचदश आहुतयः। आज्येन। यजुर्वेदं दीक्षीयमाणो। सोमा

यस्वाहेत्येतस्मनंतरो अंतरिक्षाय स्वाहा। इदमंतरिक्षाय। वायवे स्वाहा। इदं वायवे। ब्रह्मणे स्वाहा। इदं ब्रह्म
णे। छंदोभ्यः स्वाहा। इदं छंदोभ्यः। प्रजापतये स्वाहा। इदं प्रजापतये। देवेभ्यः स्वाहा। इदं देवेभ्यः। ऋषिभ्यः स्वा
हा। इदं ऋषिभ्यः। श्रद्धायै स्वाहा। मेधायै स्वाहा। इदं मेधायै। सदसस्पतये स्वाहा। इदं सदसस्पतये। अ
नुमतये स्वाहा। इदमनुमतये। अथर्ववेदेऽधीयमानेप्येताः पंचदशाज्याहुतयः। अयं तु विशेषः। दि
25 वे सूर्यायेत्याहुतिद्वयंमपदेतप्यतस्थानेन्यद्वाज्याहुतिद्वयमावपेत्। तद्यथा। दिग्भ्यः स्वाहा। इदं दिग्भ्यः
चंद्रमसे स्वाहा। इदं चंद्रमसे। अधीतेषु चतुर्षु वेदेषु पक्षे प्रातिसंवत्सरं चतुर्षु वेदेषु पक्षे प्रातिसं
वत्सरं चतुर्णां वेदानां युगपदुपाकर्माणि। आज्यभागानंतरं पृथिव्यै स्वाहा। अग्नये स्वाहा। अग्नये
स्वाहा। ब्रह्मणे स्वाहा। छंदोभ्यः स्वाहा। अंतरिक्षाय स्वाहा। वायवे स्वाहा। ब्रह्मणे स्वाहा। इदं ब्रह्मणे। २७
छंदोभ्यः स्वाहा। दिवे स्वाहा। सूर्याय स्वाहा। ब्रह्मणे स्वाहा। छंदोभ्यः स्वाहा। दिग्भ्यः स्वाहा। चंद्रमसे स्वा छ
हा। ब्रह्मणे स्वाहा। छंदोभ्यः स्वाहा। ततः प्रजापतये स्वाहा। इदं प्रजापतये। देवेभ्यः स्वाहा। इदं देवेभ्यः।

रोषिभ्यः स्वाहा। इदं रोषिभ्यः। श्रद्धायै स्वाहा। इदं श्रद्धायै। मेधायै स्वाहा। इदं मेधायै। सदसस्पतये स्वाहा।
इदं सदसस्पतये। अनुमतये स्वाहा। इदं अनुमतये। एताः सप्ताज्याहुतयः मंत्रेण। ततो धानाभिघार
णं स्रुवेण धाना अवदाय सदसस्पतीमिति मंत्रेण जुहुयात्। इदं सदसस्पतये। इमं मंत्रं गुरुणा यथामा
नाशिष्यान्यपि सहानुपठेयुः। तत उदुम्बरसमित्त्रितयमभिघार्य हस्तेन गृहीत्वा उत्थाय आसुरवासिष्ठं तः।
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् स्वाहा। इत्युच्चार्य एकां समिधमादध्युः।
एवं द्वितीयां। तृतीयां च। ततः सर्वे उपविश्य। आचार्येण। स्रुवेण धाना अवदाय। सदसस्पतिमिति
मंत्रमुक्त्वा जुहुयात्। द्वितीयां धानाहुतिं पूर्ववत्। इदं सदसस्पतये। ततस्तिस्रोपराः। समिधो घृतेनाभ्य
ज्य उत्थाय आसुरवासिष्ठेनः। तत्सवितुः प्रचोदयात्। इत्युच्चार्य एवं द्वितीयां तृतीयां च ततः सर्वे उपवि
श्य तथैवाचार्येण धाना स्रुवेणादाय। सदसस्पतिमिति मंत्रमुक्त्वा धानाहुतिं जुहुयात्। इदं सदसस्पतये।
मंत्रानुपठनं शिष्याणामपि। तथैवाचार्येण धानाः। स्रुवेणावदाय। सदसस्पतिमिति मंत्रमुक्त्वा तृतीयां

धनाहुतिं जुहुयात्॥ इदं सदसस्पतये॥ मंत्रान्ते पठनं शिष्याणामपि॥ ततो न्यासित्वः समिधो घृतेनाभ्यक्तम्
वित्तु प्रबोधया स्वाहा॥ इत्युक्त्वा॥ एकां समिधमादध्यात्॥ क्रमेण द्वितीयां तृतीयां च समिधं ब्रह्मचारी तूष्णी
व्याहरन्हरग्निकार्यमंत्रेण॥ अग्नये समिधमाहार्षमित्यादिना समिदाधानं कुर्यान्न सावित्र्या॥ अन्यत्सर्वं
समानमनयोः सह॥ ततो याउपकृता॥ धाना स्ताः सर्वाः शिष्याः स्वोपगृहीत्वा शंनो भवंत्विति मंत्रेण दंतैर
खादंतः प्राश्नीयुः॥ द्विराचमनं॥ दधिक्राव्णो आवापयित्वा वंतं शिष्यगणमात्मनि छेत्तावंतं सितानां गणयि
त्वा आकर्षफलके वध्या यस्य क्रमोतिरित्यनुवाकेन सावित्र्यां वा जुहुयात्॥ इदं सवित्रे॥ न संस्रवा॥ ततो
धनाभ्यः स्विष्टकृत्॥ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते॥ भूरादयो नवाहुतयः॥ भूः स्वाहा॥
इदमग्नये॥ भुवः स्वाहा॥ इदं वायवे॥ स्वः स्वाहा॥ इदं सूर्याय॥ त्वं नो अग्ने॥ प्रमुमुग्ध्यस्मत्स्वाहा॥ इदमग्नी
वरुणाभ्यां॥ स त्वं नो अग्ने सुहवो न एधि स्वाहा॥ इदमग्नीवरुणाभ्यां॥ अयाश्चाग्ने भेषजं स्वाहा॥ इ २५
दमग्नये॥ ये ते शतं॥ स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः॥

गदाधरभट्टविरचितायां प्रयोगपद्धतौ उपाकर्मसमाप्तम्॥ ॥ॐ॥ कोल्हापुरभवरूपी ठनिकेतनां स्वांतलक्ष्मी महापद्मसुतं पुरतः पुराणां॥ वेळापदे त्र्यंबकदानवराशं श्रुतां तां त्रैतांबिकां चकुलमातरमतनोस्मि॥१॥ विश्वेश्वरं हरिहरौ गजवक्त्रसरस्वती गणकात्यायनं वरनिजलक्ष्म्यं त प्रणम्य॥ श्रीरेणुकादिवरपद्धतिरुन्मनाानि संविदुपाकर्मखपद्धतिमातनोस्मि॥२॥ ॥श्री॥ ८

उदुत्तमोस्यामस्वाहा। इदं वरुणाय। प्रजापतये स्वाहा। इदं प्रजापतये। संस्रवप्राशनं। मार्जनं। पवित्रप्रतिपत्तिः। ब्रह्मणे वरदानं। यथा ब्रह्मन्नुं ब्रह्मस्य उपाकर्मणोंगतया विहितो यत्ते वरः प्रतिगृह्यतां। प्रणीतावीमोकः। ततो स्मिमुत्तरेण कुशेषु प्रत्यङ्मुखेभ्यः। उपविष्टेभ्यः शिष्येभ्यः। प्राङ्मुख आचार्यः। ॐकारमुक्त्वा त्रिभिश्च सावित्रीमनुब्रूयात्। यथा तत्सवितुर्वरेण्यं प्रचोदयात्। इषेत्वा। कृष्णोसि। ग्नमीवाके ग्रावास्य मंतं॥ व्रतमुपेष्य निसादिस वेनं च ब्राह्मणायोरध्यायाधीत्रति ब्रूयात्॥ बहुवृचानां रुचि रुचाने॥ पवीति छंदोगानां। स्कानथर्वणानां। एवं सर्वेषटित्वा गुरुः शिष्याश्च जपंति। सहनोस्त्वह सहनावतु सहनद्धं विर्यं वसत्कुत्रह्म। इदं स्तेहदयेन यथा न विद्विषामहे इति मंत्रं त्रिरात्रमध्ययनं लोमनखनिकृंतनं। वयं न करिष्यामहे। इति सर्वेषां संकल्पः। प्रागुत्सर्गाद्दानि यमो लोमनखनिकृंतनस्याऽउत्सर्गावधि लोमनखनिकृंतनमहं करिष्ये॥ इति उत्सर्गात्प्राक्तत्र ब्राह्मणयोरध्ययनं॥ ॥इति श्रीमद्घग्र विद्याविं अथ पाकयज्ञकर्मपद्धतिः विरच्यते। तियपाकयज्ञः कृताकृतः प्रकृतेः प्राक्षितः संस्काने हेनवाचाविधानुक्माः तेषु हूतहोमपक्षादिकर्मादियावज्जीवमनुष्ठेयः। इतरेषु श्रवणाकर्मादिषु न नियमः। तत्र प्रकृतसंस्कोषु श्रवणाकर्मताव दूव्यते॥ तत्र प्रथमप्रयोग एव नित्यार्जनां तं वैश्वदेविकं कृत्वाभ्युदयिकं श्राद्धं कुर्वीत॥ तत्र यजमानः॥

26

णायामादेशकालौ स्मृत्वा गोत्रपितृनामसंकीर्त्य श्रवणाकर्मांगं जनिमित्तमाभ्युदयि
कं श्राद्धं मातृपूजनपूर्वकमहं करिष्ये इति संकल्प्य कृत्वा मातृपूजनं श्राद्धं च यथाविधि कृत्वा ब्राह्मणान्विसर्ज्य सुधीः।
पत्न्या सहितोऽग्नेः पश्चाद्वा प्राङ्मुपविश्य प्राणायामान्कृत्वा देशकालस्मरणं च कृत्वा श्रवणाकर्माहं करिष्य इति सं
कल्पं कृत्वा वैकल्पिकाः स्मरेत्। तत्रासकृत्सकृद्वा श्रवणाकर्मादिकरणं पश्चात्पूर्वेणाग्निं वाऽग्रमनो अपरेण वो ब्रह्मणो ४
त्तरेण वा पात्रासादनं। द्वे पवित्रे। त्रीणि वा पवित्राणि। तुलसी आज्यस्थाली। मृन्मयी वा। पालाशः समिधः।
उत्तरयज्ञवृक्षमय्यो वा। गवां गवानां पिष्टं तंडुलानां वा। पूर्णपात्रं चरो वा। प्रांचा वा द्वारो दिदृशो वा। समि
द्वत्रमेत्र अपामार्गकोण्यो वा। एषामन्यतरं पदमंगीकृत्य देनैवाशी कृतपद्मेण संवत्सरमुत्तराणि क
र्माणि कुर्यात्। पूर्णपात्रादिषु संभवविकल्पेषु नायं नियमः। एतान्वैकल्पिकानुपदार्थानहं करिष्य इति सं
स्मृत्य मंत्राणामार्षादिकं स्मरेत्। ततः अपश्वेतपा इति द्वयोः प्रजापतिऋषिः श्वेतपा देवता प्रथमस्य
श्वेतो देवतौ द्वितीयस्य। द्वावपि कंठोहीनो। होमे विनियोगः। धानावंतमिति विश्वामित्रऋषिः इंद्रो देवता। २६
गायत्री छंदः अन्नप्राशने होमे विनियोगः। भूरादीनां पूर्ववत्। आग्नेयपांशुरिद्मे मंत्राणां परमेष्ठी प्रजाप ८

परिसंख्योक्तितत्सूत्रकालस्यान्यस्मृतेर्बलात्॥ वचनात्सूत्रकारस्य सकृदस्य क्रिया भवेत्॥१॥

तिऋषिः लिंगोक्ता देवताः छंदो हीनाः होमे बलिदाने विनियोगः । नमोस्त्विति त्र्याणां प्रजापतिऋषिः
साध्या वा ऋषयः देवाः सर्वाद्या देवताः । अनुष्टुप्छंदः । उपस्थाने विनियोगः । आपो हिष्ठेति तिसृणां सिं
धुद्वीप ऋषिः । आपो देवता गायत्री छंदः । मार्जने विनियोगः । इत्याद्यृष्यादिकं स्मृत्वा देवतां भिध्यायेत् ।
तत्र प्रजापतिः इंद्रो अग्निः सोमः श्वेतपद्मः श्वेतवैदूर्य आकल्पेन । विष्णुः अप्रवर्णः । आवर्णी पौर्णमासी वर्षा
वा वरुणः । इंद्रे ध्यानात्तिः । अग्नेयपांडुपार्थिवानां सर्पाणामधिपतिः । श्वेतवायव्यां सौ वर्षा । वरुणः । इं
द्रंध्यानात्तिः । आग्नेयपांडुपार्थिवानां सर्पाणामधिपतिः । श्वेतवायवांतरिक्षाणां सर्पाणामधिपतिः । अ
ग्निमूर्त्तः सौर्यो दिव्यानां । सर्पाणामधिपतिः । सक्तुभिः । ध्रुवं सोमे सर्वं कृते मधु रोजाशनो । आग्निं स्विष्टकृतो
वरुध्याना सक्तुशेषेण सूत्रादीनां सर्वदेवताः पुनराग्नेयपांडुरादी सक्तु बलिभिः । एता अंगानि ध्यानाधीदे
वता अहं यजे । इत्यादि ध्यायः । अमुकशर्मन्नस्मिन् कर्म्मणि त्वं ब्रह्मा भवेति ब्रह्मवरणं । भवामी
ति ब्रह्मप्रतिवचनं । ब्रह्मोपवेशनं । प्रणीताप्रणयनं । परिस्तरणं सपूर्वं वातौ पात्रासादने वरुस्थाल्या

अनंतरं भर्जनासादनं। भर्जनानंतरं पाणिसंमितं कपालासादनं। एवं तंडुलानंतरं पात्रान्यपि दृषद्वासाद्य च रुस्था
ली भर्जनं कपाले संमार्गकुशादीनि तथा तंडुलाय वा पिष्टचूर्णपात्रमिति चार्थवदासाद्य तत्तदुत्तरतः। उ
पलो दृषदो शूर्पो यस्तत्कृतमथमुदपात्रं। दर्वी प्रादेशमात्रा। त्रिरंती नित्री। एवं वैकंकतानि। अंजनं।
अनुलेपनं। स्रजा। उल्मुकार्थकाष्ठं। उल्का। क्षारकं। मार्जनीयोदपात्रं। साधनांर्थे लौकिका। क्षत्वा। श्रोपक
ल्प्या पवित्रकरणादि कृत्वा। सादनक्रमेणैव प्रोक्षणपात्राणि निक्षिप्य खररस्थानात् स्थानादुत्तरतोन
र्जनस्थाने तापनसमर्थमंगारं निक्षिप्य। तत्र भर्जनमुपक्षाप्य। तत्र सव्याशूर्ने अंगारं निक्षिप्य। तदुत्तर -
तः कपालस्थाने प्येवमेवांगारं निक्षिप्य कपालोपक्षानं। पुनस्तदुपर्यंगारनिधानं च कुर्यात्। यदि ख
27 रस्थाने वर्तनकपालानां विश्रयणावकाशो नास्ति तदा भर्जनकपाले नाविश्रयणपर्यास्ते देशं बहिः २७
संतप्य प्रोक्षयतः। प्रणतान्वमसादीनां प्रोक्षणे का र्यप्रणीताप्रोक्षणीनामुत्तरस्थाने क्षानि यमान ८
सस्था। नानुर्जनादायश्रयणांत घृतं अज्यस्था। ल्यो माज्यं निरुप्य प्रणीतोदक सहिता यां चरुस्थाल्यां

तंडुलांन्प्रक्षिप्य। प्रणीतोदकेन पिष्टं संयूय पात्र्यां शफमात्रं पुरोडाशं कृत्वा। स्रुगप
दाज्यादीन्यधिश्रययेत्सुः॥ तत्राज्यं ब्रह्मा। चरुं यजमानः। स्रुतप्ते मर्जनेयवानुल्मुका। धा
रकः स्रुतप्तेकपाले पुरोडाशस्याधिश्रयणं। ततः सर्वेषां पर्यग्निकरणं। अपणांच। स्रुवं प्रतप्य।
आज्यादीनि क्रमेणोद्वासयेत्। तत्रानुद्वासितानां पूर्वेणोद्वासितानामपरेणेत्येवमेके —
कंदरुविरुदगुद्वासयेत्। तत्राज्यमुद्वास्य ब्रह्मणीस्थाने ततः पश्चिमदेशे निधाय। आज्यादुत्त शे५
रतश्चरुं। चरोरुत्तरतो धानासहितं मर्जनं। मर्जनादुत्तरतः पुरोडाशसहितं कपालं निधा
य। धानाद्यर्थमुद्धृतानग्न्यंशान्पुनरग्नौ प्रक्षिप्य। प्रोत्सारितानिप्रोक्षणादीनि पूर्ववत्स्था
ने निधाय। प्रोक्षणीपुत्पवनं तं कृत्वा हुतिद्वयपर्याप्तं धानाः पात्रान्तरे संस्थाप्य तत्राः वेसि
पिष्ट्वा तेषां सक्तूनां स्थाप्याज्येनांजनं कार्यं। तत्राज्यमानीय स्रुचपुरतो निर्योपयम नाद्या भा२
ज्यमातं कृत्वाज्याहुतिद्वयं जुहुयात्। ॐ अपश्वेतपदाजहि पूर्वेण वापरेण वा। सप्तवत्वा

कृताभिरिमाः प्रजाः सर्वाश्च राजबांधवैः स्वाहा ॥ इदं श्वेतपदे न मम ॥ ॐ नवै श्वेतस्याध्याच
रेहिं दद्दर्शकं च न । श्वेताय वैदर्व्याय नमः स्वाहा ॥ इदं श्वेताय वैदर्व्याय न मम ॥ ततश्चरु
मभिघार्य तेनाहुतिचतुष्टयं जुहुयात् ॥ ॐ विष्णवे स्वाहा । ॐ श्रवणाय स्वाहा । ॐ श्रावण्यै
पौर्णमास्यै स्वाहा । वर्षाभ्यः स्वाहा । आस्वुपथा देवतंत्यागः । ततो धानामभिघार्य स्रुवे
ण होमः । ॐ धानावंतं करंभिणमपूपवंतमुक्थिनम् ॥ इंद्र प्रातर्जुषस्व नः स्वाहा । इदमिंद्राय न मम ॥ इति
धानानामेकाहुतिं न त आहुतिचतुष्टयपर्याप्तांस्तत्तूष्णीं पात्रांतरे कृत्वा तेषां हुतं ज
न लोम्ना अभिघारणं तैः पात्रांतरेण कृतसक्तुभिराहुतित्रयं स्रुवेण । ॐ अग्नये पांडुपा
र्थिवानां सर्पाणामधिपतये स्वाहा ॥ इदमाग्नेय पांडुपार्थिवानां सर्पाणामधिप
तये न मम ॥ ततः पुरोडाशमभिघार्य स्रुवेणावदाय । ध्रुवाय भौमाय स्वाहा ॥ इदं ध्रुवाय
भौमाय न ममेति सर्वपुरोडाशं त्वा वरुध्यानां सक्तुशेषाः स्विष्टकृत् । अग्नये स्विष्टकृते स्वाहा ॥ ॥ २७ ॥
इदमग्नये स्विष्टकृते न मम । भूराद्याः प्राजापत्यांताः पूर्ववत् । प्राशनादि विमोकांतं कृत्वा ।

28

बलित्रयस्य पर्याप्ताधिकान्सक्तून् शूर्पे न्युप्यान्यत्र तच्छूर्पं दर्वीकं कतानि अंजनं गंधं स्रज अग्नि‍ हवीवा
यजमानो ब्रह्मणाः पत्न्योल्कांधारिणा वसरुद्र ल्कायां ध्रियमाणायां बलिनिष्क्रम्य वा सायत्
त्वाग्नावोप वि रस्य प्रातःसवने नमां तराग मते तिप्रैषं कुर्यात्॥ प्रैषे कृते नियजमानयोरंतरेण
न कश्चिद् गच्छेत्॥ यजमानस्तत्प्रैषमुक्तोप लिप्तस्थंडिले वाग्य तत्र दर्वीपात्रेण प्रागुदग्वाग्नेयपां
ड्वादिस्थि मिमंत्रैः सर्पानवनेजयेत्॥ आग्नेयपांडुपार्थिवानां सर्पाणामधिपते ‍ वने
निक्ष्वेति तत्र प्रयोगः॥ एवमुत्तरयोर्मंत्रयोः॥ ततो दर्व्या शूर्पात्सक्तून्वदायावनेजनस्था न
षु यथाक्रमं प्रतिमंत्रमाग्नेयपांड्वादिमंत्रैर्बलीन्हरेत्॥ तत्राग्नेयपांडुपार्थिवानां सर्पाणा
मधिपतय एष ते बलिः॥ इदमाग्नेयपांडुपार्थिवानां सर्पाणामधिपतये न ममेति प्रयोगः॥
एवमुत्तरयोर्मंत्रयोः॥ तत्र पुनरवनेजनं पूर्ववत्॥ ततः संहतैः कंकतैरग्नेयपांड्वादिमंत्रैः
प्रतिमंत्रमधिपते प्रलिख्यस्वेति प्रयोगे प्रतिबलिं प्रलिखेत्॥ ततस्तथैव तैर्मंत्रैरधिपतेंज स्वेति प्र
योगेणांजनेन बलीनंजयेत्॥ ततस्तथैव मंत्रैरधिपतयेनुलिंपस्वेति प्रयोगेणानुलेपनेन
बलीननुलिंपेत्॥ ततस्तथैव प्रतिमंत्रं तैरेव मंत्रैरधिपते स्रजोपिनह्यस्वेति प्रयोगेण प्रति ब

ली नूत्स्नजोदधारा॥ ततः सक्तुशेषं स्थंडिले न्युप्य तदुपरि उदपात्रं निनीय नमो स्तु सर्पेभ्यः
इति तिसृभिरृग्भिः सर्पानुपतिष्ठते॥ यावदितो देशात्सर्पान प्रवेशं कामयेत तावंतं देशमवच्छि
न्नयोदधारया अपश्वेतपदा जहीति स्वाहा वर्जिताभ्यां मंत्राभ्यां ब्रह्मोल्काधारिसहितः परि
षिंचन् सकृत्परीत्य हविस्तु द्वीपरीयात्॥ एवं त्रिः परीत्य त्रिः परिषिंचन वर्जनमितरथावृत्तिस्तू
ष्णीं॥ ततो दर्वीं सूर्पं च प्रक्षाल्योल्कायां प्रतप्योल्काधारिहस्ते प्रयच्छेत्॥ ततः द्वारसमीपमाग
29 त्योपविश्य यजमानो मार्जनीयोपोदकेनापो हि ष्ठेति तिसृभिर्मंत्रैर्मुखमुपस्पृशेत्॥ ततस्त
थैव ब्रह्मोल्काधारी मुखमुपस्पृश्य सर्वे क्रमेण गृहं प्रविश्योपविश्य धाना अस्वादंतः
प्राश्नीयुः॥ ततः श्रवणाकर्मांगत्वाहिताग्निर्जनमहं करिष्ये॥ इति संकल्प्य ब्राह्मणं भोजयेत्
इत्वं सर्वं सक्तुशेषं सुगुप्ते गांडारे स्थापयेत्॥ पुनरपरेद्युः सायंहोमानंतरं यजमानः सक्तु २९
शेषाद्द्विस्त्रिर्वा दर्वीकान् सक्तून् सूर्पे कृत्वोदपात्रं तत्सूर्पे दर्वीं कं कंतानि वा गृहीत्वा प्रदी
प्तोल्कापाणिरुल्काधारी वद्धे निष्क्रम्य बाह्यशालायामुपलिप्तदेशे प्रवर्जमवनेजनादि प्रत्ने
स्वांतं बलिहरणं पूर्ववद्विधाय॥ सक्तुशेषं स्थंडिले न्युप्योदपात्रं निनीय दर्वीं सूर्पं च प्रक्षा

ऐषाण्यादेवपि बलिहरणो क्रियमाणो । नियजमानयोर्विय
ल्यानि हव्यात् ॥ नमो स्त्रिति उपतिष्ठते । एवं सायंहोमानंतरो केवलिहरणं । मार्गशीर्षपौ
जमानयोः स्वांतरेण कास्विकतृ विन्नगच्छेत् ॥ अथ वस्त्रचकारस्य ॥ परिसंख्यो के गौणाका
र्णमासी यथा वत्सरस्य हि सायंहोमानंतरं कार्यं ॥ विलोपप्रायश्चित्रं राघुकं न स्नर्वमिसहस्त्रहो द्वितीया
लाभावः यच्चुसहूनेकादिना श्रवणाकर्म विलोप ॥ अथाभ्युदयम् उच्यते ॥ एवं ऐष्टपघायोणिना
घात्रिविश्वार्यं वेदितव्यं ॥ ॥ इति श्रवणाकर्म ॥ ॥ [illegible] मातृपूजनपूर्वकमाभ्युदयिकं श्राद्धं चरुचाग्नेः पुष्टा
स्यां भवति ॥ तत्र प्रथमप्रयोगे ग्रहयज्ञारंभनिमित्तं [illegible] पूर्वकं परमेश्वरप्रीत्यर्थं तथेदं यक्ष्महं के ष्ट्वा ॥
उपविश्य प्राणायामत्रयं देशकालौ संकीर्त्य [illegible] स्वामंत्राणामार्षादिकं समे
इति संकल्प्य स्वापूजादिकं समस्तमानं वैकल्पिकां [illegible] अग्नयश्च भामेश्चेदं देवीरित्यं [illegible] तानाम
न्त्रा ॥ स्नादीनां पूर्ववत् ॥ शुक्रज्योतिरित्यादीनां त्र्यग्रश्च भामेश्चेदं देवीरित्यं
ष्टानां मंत्राणां प्रजापतिरृषिः मरुतो देवता साध्या वा शुक्रज्योतिरित्यस्या [illegible] ग्निकं छंदः
इदं हुतश्चेत्यस्या गायत्री छंदः ऋतजिच्च इत्यस्योष्णिक् छंदः इदृक्षा सदृक्षस्य जगती छंदः स्व
तवांश्चेत्यस्य गायत्र्याः छिग्वा छंदः त्र्यग्रश्चेत्यस्य गायत्री छंदः एषां सप्तानां मरुत होमे विनियो

गः अत्र बल्हिरणे विनियोगः॥ इंद्रं देवी रित्यस्य जगती छंदः रूपे विनियोगः॥ ततो देवताभिध्यानं॥
तत्र प्रजापतिं। इंद्रं। अग्निं। सोमं। इंद्रं। इंद्राग्नी। अजमेकपदं। अहिर्बुध्न्यं। प्रोष्टपदा। आग्नेन। इंद्रंपायसेन अ
ग्नि ... तंपायसं त्रेशेषेण॥ भूरादीनां पूर्ववत्। शुक्रज्योतिषं चित्रज्योतिषं सत्यज्योतिषं ज्योतिष्मं
तं। शुक्रं ऋतपसं अत्यंहसं ईदृक्षं अन्यादृक्षं प्रेतिसदृक्षं मितं संमितं सभरसं ऋतं सत्यं। ध्रुवं। धरुणं धर्त्तारं
इमरुतैः विधर्त्तारं ऋतजीतं सत्यजितं सेनजितं सुषेणं अंतिमित्रं दूरे अमित्रं गणं ईदृक्षान्। एतादृक्षान् सदृक्षान्॥
प्रतिसदृक्षान् मितान् संमितान् सभरसः स्वतवंतं प्रघासिनं सांतपनं गृहमेधिनं क्रीडिनं शाकिनं उज्जेषिणं।
उग्रं भीमं ध्वांतं धुनिं सासहं तं अभियुग्वानं विक्षिपं एताबल्हिपिः॥ यसेन एता अंगप्रधानार्थं देवता अग्निं कर्म
30 णयकर्पस्ये॥ इत्यभिध्याया समिनिंद्रयजु कर्मणाविं त्रस्तामव॥ भवामितिसप्तौ रथ प्रणीता प्रणयनं॥ परिस्तर
णं॥ अग्न्याधान वत्सा। आसदनं॥ पवित्रं सपत्राश्वत्थपत्राणि वाप कल्पयेत्॥ प्रणीतादौ रयुक्तायां वरुस्थाल्यां
तंडुलप्रक्षेपः॥ लौकिकोदकेना पूर्णा यवपिष्टं संभूय चर्वधिश्रयणं नंतरं चरोरुत्तरतोंगारेषु लौकिके स्वपि
देवाबवत्पिष्ट पानाम धिश्रयणं॥ पर्यग्निकरणादि पूर्ववत्॥ चरोरुत्तरतो सूपानामुद्वासनं॥ ग्रो हर्ष्णतुपवनां
ते अपूपैः आगाघारः परिस्तरणं॥ उपयमना घारुस्रागां तंकृत्वा पंचाहुतीर्जुहुयात्॥ ॐ इंद्रायस्वा-॥ भूव॥
हा॥ इंद्रमिंद्राय नमम॥ ॐ इंद्राग्निभ्यां स्वाहा॥ इदमिं॥ ॐ अजायैकपदे स्वाहा॥ इदं॥ ॐ अहिर्बुध्न्याय॥ इदम॥

ॐ ग्रोष्ठपदाभ्यः। इदं ०। ततोऽग्निर्घार्यपायसेन। ॐ इंद्राय स्वाहा। इदमिंद्रायेत्येकाहुतिः ततः पाय
सशेषमासिद्दूरुद्र॥ भूम्याघानवाकुनयः। प्राग्राग्नौ मध्ये दिविमो कांते अग्नेरूत्तरतः प्राक्संस्थान्मुदक्संस्था
निवासप्तान्स्वरूपत्रातीसंस्थाप्यतेषुपायसशेषेण शुक्रज्योतिश्चेत्यादिभिः उग्रश्चेत्यंतैः सप्तभिर्न
मोनैर्मंत्रैः क्रमेणाप्रतिमंत्रं स्रुवेणमरुद्भ्यो बलीन्दद्यात्॥ तत्रप्रयोगः॥ शुक्रज्योतिश्चेत्यादिरूतपाश्चा
त्सप्तहायनमः॥ इदं शुक्रज्योतिषे सत्यज्योतिषेज्योतिष्मते शुक्राय ऋतपसे सत्यपाह सेवनमम॥१॥
इदंत्विश्वेत्यादि संमितश्च सभरायन (चित्रज्योतिष) मम॥ इदमिदृक्षेन्यादृक्षे सदृक्षे प्रतिसदृक्षे मिताय
संमिताय सभरसे वनमम॥२॥ ऋतश्चसत्यादिविधारयो नमः॥ इदमृताय सत्याय ध्रुवाय धरुणाय ध
र्त्रे विधर्त्रे विधारयाय वनमम॥३॥ ऋतजिच्चेत्यादि दूरे अमित्रश्च गणो नमः॥ इदमृतजिते सत्यजि
तेसेनजितेसुषेणाय अंतिमित्राय दूरे अमित्राय गणाय वनमम॥४॥ ईदृक्षास इत्यादि यक्ष्मिणि नम॥
ईदृक्षेभ्यः एतादृक्षेभ्यः सदृक्षेभ्यः प्रतिसदृक्षेभ्यो मितेभ्यः संमितेभ्यः सभरसेभ्यो मरुद्भ्यो वनमम॥५॥
स्वतवांश्चेत्यादिवोऽरूषी नमः॥ इदं स्वतवते प्रघासिने सांतपनाय गृहमेधिने मरुद्भ्यः क्रीडि
ने शाकिने ऊजिषिणे वनमम॥६॥ उग्रश्च भीमश्च ध्वांतश्च धुनिश्च सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा नमः॥
दृमीदृ

रुद्रमुग्राय भीमाय ध्वांताय धुनये सासह्कते अग्नि सुमवते विहितिपाय ॥१॥ ततः इंद्रं देवीरितितत्रैवरूपि
चा ॥ इंद्रपक्षौ मिकेन ब्राह्मणभोजनं कुर्यात् ॥ स्मृतकारिमुख्यकात्यायनकृते संभवे स्मृत्यकार
मतेनाश्विन्याः पौर्णमास्या अर्वाक् गौणकालेप्यनादिष्टपूर्वकमिदं कर्तव्यं ॥ ॥इतीन्द्रयज्ञः॥
अथ पृषातकाकर्मोच्यते ॥ तच्चाश्वयुज्यां पौर्णमास्यां भवति ॥ तत्र तद्दिने प्रातस्नानानंतरं कुड्योपलेपनादि
भिः स्वगृहं अलंकुर्यात् ॥ मध्यापकर्षणाल्वं कुंदनालंकरणान्तनगृहान्गाबमादिभिश्च सर्वे गृहाः अलं
31 कृता भवेयुः ॥ तत्र प्रथमप्रयोगे पृषातकाकर्मनिमित्तं मातृपूजनपूर्वकमाभ्युदयिकं श्राद्धं कृत्वाग्निम
परेणोपविश्य प्राणायामादि कृत्वा परमेश्वरप्रीतये पृषातकाकर्माहं करिष्ये ॥ इति संकल्प्य मुख्याचैद्भि
द्गृववद्देकल्पिकान्समवाप्य आदिकं समेरं ॥ भूरादीनामार्षादिकं पूर्ववत्स्मरेत् ॥ ॐ नं मे पूर्यतामिति मंत्रस्य
गौतमऋषिः गायत्रीछंदः अग्निर्देवता होमे विनियोगः ॥ अयं विंद्र इत्यस्य वामदेवऋषिः आनइंद्रइत्यस्याः
प्रजापतिऋषिः आनइंद्रो हरिभिरित्यस्याः सरस्वतीऋषिः त्वामगारमित्यस्याः गार्ग्यऋषिः इंद्रसुत्रामेत्यस्य वयमित्य
नयोरश्विनावृषी ॥ आमंद्रैरित्यस्याः विश्वामित्रऋषिः एवेदिंद्रमित्यस्याः वसिष्ठऋषिः सप्तानां त्रिष्टुप् छंदः अ ॥२१॥
नुष्टुभ्याः बृहती छंदः अष्टानामिंद्रो देवता सौत्रामण्यामेंद्रपात्रा होत्रिके विनियोगः ॥ अत्र च च वा विकल्पो विनियो
गः ॥ ततो देवताभिध्यानं ॥ तत्र प्रजापतिं । इंद्रं । अग्निं । सोमं एतादेवता आज्येन । इंद्रं । इंद्राणीं ॥ अश्विनौ ॥ श्रीअश्वयुजी ॥

पौर्णमासी॥ शारदं। दधिघृतमधुघृतमिश्रपायसेन॥ अग्नि० स्विष्टकृतं पायसशेषेण॥ भू-
राद्दिनां पूर्ववत्स्नमवा अग्निं पृषदाज्येन॥ एता देवता अंगप्रधानार्थे देवता अस्मिन् कर्मण्यहं
यक्ष्ये॥ अस्तवरणं॥ सन्नीय प्रणीताप्रणायनादि पूर्ववत्॥ दधिमधाज्यानां पृषदाज्य
स्य चोपकल्पनं॥ प्रोक्षणं पुत्पवनान्तं कृत्वोपयमनकुशानास्तुवे पायसे दधिमधुघृत
सेकः॥ उपयमनादिना चाज्यभागांतं कृत्वाभिघार्य पायसेन पंचाहुतीर्जुहुयात्॥
ॐ इंद्राय १ ॐ इंद्राण्यै २ ॐ अश्विभ्यां ३ ॐ आश्वयुज्यै पौर्णमास्यै ४ शारदाय स्वाहा॥ यथादेवतं
त्यागः॥ पायसशेषेण स्विष्टकृत्॥ भूराद्याः प्राजापत्यांताः प्रायश्चित्तादि विमोकांतं च पूर्वव
त्॥ ततः उपकल्पितपृषदाज्यं यजमा[illegible] नांजलावन्य आसिंचेत्॥ ततो यजमानस्तं मेष
र्यतां पूर्णमिमावय्गत्स्वाहेत्यंजलिना पृषदाज्यं कुर्यात्॥ इदमग्नये त्यागः॥ ततः पत्नी
गृह्यास्थायत हिरण्यदूत्यादिना पृथ्यं पातस्वस्तिभिः सदानः॥ इत्यंतेनाष्टर्चेनानुवाके

नवरुद्गोषमवेक्षेरन्॥ ततः पश्चात्काकर्मांगि ब्राह्मणभोजनं॥ गृह्येणावोविघ्नंतेदोतंतत
स्यां रात्रौ माघ्रभिवेश्मसंस्कुर्युः॥ एतत्कर्म्म मुख्यकालसंभवे गौणेपिकर्त्तव्यं॥ ॥इति
पश्चात्काकर्म॥ ॥अथाग्रहायणीकर्मोच्यते॥ तत्र मार्गशीर्षपौर्णमास्यां भवति॥ त
३२ त्र प्रथमप्रयोगे मातृपूजनपूर्वकं माभ्युदयिकंश्राद्धं कृत्वा अग्निमुपसमाधाय पति
पवित्रमयजमानप्राणायाम्य परमेश्वरप्रीतये आग्रहायणीकर्म अहं करिष्ये॥ इतिसंक
ल्पं कृत्वा पूर्ववाद्धकल्पिकांतस्य मंत्राणामार्षादिकं स्मरेत्॥ तत्रअपश्वेतपदेत्याः
ह्वयोः पूर्ववत्॥ यां जनाः प्रतिनंदंति संवत्सरस्य प्रतिमेत्येतयोः वामदेव ऋषिः अनुष्टु तिप
प्छंदः रात्रीदेवता॥ संवत्सरायपरिवत्सराय ग्रीष्मो हेमंत इत्येतयोः शालंकायन ऋषिः त्रि
ष्टुप्छंदः संवत्सरादयो ग्रीष्मादयश्च पंचपंच क्रमाद्देवताः एषां वरुणाग्निहोमे विनियोगः
भूरादीनां तु पूर्ववत्॥ आग्नेयपांडुपार्थिवानामित्यंत्राणां मापाहिष्टेति त्रयाणां मंत्रा ३२
णां नमोस्तु सर्पेभ्य इति त्रयाणां पूर्ववद्दृष्यादीन् स्मृत्वा देवताभिध्यायेत्॥ तत्रप्रजा

पतिं। इंद्रं। अग्निं। सोमं॥ श्वेतपदं। श्वेतं वै देव्यौ॥ रात्रीं रात्रं संवत्सरं परिवत्सरं। इदावत्स
रं। इद्वत्सरं। वत्सरं। ग्रीष्मं॥ हेमंतं। वसंतं। वर्षाः। शरदं। एता देवता आज्येन॥ सोमं
मृगशिरसं। मार्गशीर्षीं पौर्णमासीं॥ हेमंतं स्थालीपाकेन अग्निं च स्विष्टकृ
तं वरुणं घोषेण॥ भूमादीनां मानतयपाद्वादीनां त्रूष्ट्र्वविन्न॥ अभिध्याय॥ एता अंगप्रधा
नार्था देवता अग्निं कर्मण्यपर्युक्ष्ये॥ इत्यक्तो अग्निनाग्रतायणीकर्मणि त्वं ब्रह्मा भवेति
ब्रह्मवरणादि पात्रासादनांतं कृत्वा शूर्पादीन् धानावर्जितान् श्रवणाकर्मवदुपकल्प
यो हृणं वरुश्चपणा घाज्या भागांतं कृत्वा॥ आपश्वेतपदां जुहीत्याकृतीद्वयं कुर्यात् यांजना
घाश्वेतस्य आकृतीं कुर्यात्॥ यां जनाः प्रतिनंदंति रात्रीं धेनुमिवायतीं॥ संवत्सरस्य
या पत्नी सा नो अस्तु सुमंगली स्वाहा॥ इदं रात्र्यै न मम॥ संवत्सरस्य प्रतिमां यां त्वा रात्रि उपा
स्महे॥ प्रजां च सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा॥ इदं रात्र्यै न मम॥ संवत्सराय परिवत्स
राय इदावत्सराय इद्वत्सराय वत्सराय कृणुत नमः॥ तेषां वयं च सुमतौ यज्ञियानां ज्यो

गृहीजाहुताः स्याम स्वाहा॥ इदं संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सरायवत्सराय च न
मम॥ ग्रीष्मो हेमंत उत नो वसंतः शिवा नो वर्षा अभया शरन्नः॥ तेषामृतूनां शतशारदा
नां निवात एषामभये वसेम स्वाहा॥ इदं ग्रीष्माय हेमंताय वसंताय वर्षाभ्यः शरदे च
न मम॥ ततो मिश्रियस्थालीपाकेन चतस्र आहुतीर्जुहुयात्॥ ॐ सोमाय ऽ ॐ मृगशिरसे स्वा
ॐ मार्गशीर्ष्यै पौर्णमास्यै स्वाहा ॐ हेमंताय स्वाहा ४॥ ॐ अग्नये स्विष्टकृते स्वाहा॥ यथादै
वतं त्यागः॥ ततो महाव्याहृत्यादि विमोकांतं कृत्वा ऽपूपसक्तुनिर्वपणादि मार्जनांतं सर्वं
बलिकर्म श्रवणाकर्मवद्विधाय यजमानः उपस्थाय बलिरिति ब्रूयात्॥ रात्रौ मात्रभि
र्वस्त्रां स्रस्तरे संविशेत्॥ अत्र स्रस्तरकाम्यस्य परिसंख्या केचिन्मुनयः कालानियमात् होमकाला
भावः॥ ॥इत्याग्रहायणीकर्म॥ ॥अथ स्रस्तरारोहणमुच्यते॥ तत्र मार्गशीर्ष्याः पौर्ण
मास्या ऊर्ध्वं तस्या एव आगामिन्याष्टम्या अर्वाक् कस्मिंश्चिद्दिने वासरे कर्तव्यं॥ तत्र न दहरं
गृहं गत्वा स्वपूर्ववद्दर्भं कृतास्युः यदा निशाकालायां स्वरा वकाशो न विद्यते॥ तदा दे ३३

33

नरेश्वरश्शुद्धिं विहाय॥ तत्राग्निं स्थाप्य तत्रैव कर्त्तव्यं॥ तत्र प्रथमप्रयोगे स्वस्तमारोहणानि
मित्रमाभ्युदयिकं श्राद्धं मातृपूजनपूर्वकं कृत्वाग्निमपरेणायजमानः पत्नी च पुत्रादि
योगम्यास्य यथाकनिष्ठमुदकूसंस्थाः प्राङ्मुखमुपवेशयेयुः॥ ततो यजमानः प्राणायामा
दिकं कृत्वा परमेश्वरप्रीतये स्वस्तमारोहणमहं करिष्ये॥ इति संकल्पं कृत्वा कृष्यादिकं
स्मरेत्॥ अयमग्निर्वीततम इत्यस्य प्रजापतिऋषिः अनुष्टुप्छंदः अग्निर्देवता जपे विनियो
गः॥ दैवीं नावमित्यस्य प्रजापतिऋषिः गा० अ० दितिर्देवता॥ सुनावमित्यस्याश्विनावृषी
गायत्री० अश्विनौ दे०॥ आ नो मित्रावरुणेत्यस्य सरस्वती ऋषिः गा० मित्रावरुणौ देवते॥ त्र
याणां नौ त्रारोहणे पत्न्यौ होत्रिके विनियोगः॥ अत्र देवजकिकरणे विनियोगः॥ आयुः कीर्ति
रित्यस्य गोतम ऋषिः गा० अग्नि० स्वस्तमारोहणे विनियोगः॥ सुहेमंत इत्यस्याश्वला
यन ऋषिः पं० हेमंतादयः पंच देवता जपे विनियोगः॥ स्योना पृथिवी इत्यस्य दध्यं
ङाथर्वण ऋषिः गा० पृथिवी देवता शांतिकरणे विनियोगः॥ अत्र त्र्यायने विनियोगः

उद्वायुषेत्यस्य गोतम ऋषिः गा० अग्नि० उद्धाने०॥ इत्यस्मिन् चाग्रं थिते दर्भैः छायापुत्रादिसहि
तस्यात्मनः शयनपर्याप्तं संस्तरं कृत्वा तं यजमानोग्नेः पश्चात्प्रागग्रमास्तीर्य तस्योपरि
नवस्तृणमुदगग्रमास्तीर्य ब्रह्मवरणादि पूर्ववत्कृत्वा॥ अग्नेरुत्तरत उदपात्रं शमीशाखां
35 सिताश्लोष्टं अश्मानं चोदकस्योत्तरतो निधाय संस्तरमुपरेणोपविश्याग्निहोमान्ते य
जमानः अयमग्निर्वीरतमो वयं भगवंतः सहस्यसातमः सुवीर्ययि श्रेष्ठो दधातु नाविति
मंत्रं जपित्वा॥ देवीनावमित्यादिमध्वारजांसि सुकृतः इत्यस्मिन्ते स्त्रिभिर्मंत्रैरधोनाभिः प्रा
वमंजलिं कृत्वा॥ ब्रह्मन्प्रत्यवरोहामेति॥ ब्रह्मणामामंत्र्य प्रत्यवरोहध्वमिति ब्रह्मणानुज्ञातो
यजमानः पत्नीपुत्रादयो गृह्याश्च यथाज्येष्ठं प्राङ्मुखा वामपादे नायुः कीर्तिर्यशो बलमन्ना
द्यं प्रजामिति मंत्रं जपंतः सर्वे क्रमेण स्वस्तमारोहयुः॥ आरुह्याक्रम्योपविश्येयुः तेषां म
ध्ये यज्ञोपनीतास्त एव सु हेमंतः सुवसंतः सुग्रीष्मः प्रतिधीयतां नः शिवा नो वर्षाः संतु शरदः ३५
संतु नः शिवा इति मंत्रं जपेयुः॥ तत्रारूढास्ते सर्वे स्योना पृथिवीति मंत्रेणारोहणारोहणकेन

ऽवप्रावि न्यारसोदक्षिणपार्श्वेः शायीरंन्॥ ततउदायुषास्त्वायुषोत्सर्जन्यस्यावृष्ट्या पृथि
व्याः स्यन्धाममिविस्पनेनमंत्रेणसर्वेक्रमाडुत्तिष्ठेयुः॥ एवं श्रुत्वानुमंत्राणा यकच्छानां
तंद्विरपरं क्रमत नवेत्॥ ततआरभ्यमासमवत्सरं यावत्ते सर्वे अधः शायीरंन्॥ यथेष्टं
वा॥ अत्रगोणकालाभावः॥ ॥इति स्वस्त्तरारोहणं॥ ॥अर्हमाग्रहायण्याः मार्गशी
र्षपौषमाघानां कृष्णाष्टमीष्वैंद्री वैश्वदेवी प्राजापत्यां ताः क्रमेणसन्निहितास्तिस्रो
ष्टकास्युः तासु तावत्प्रथम मैंद्री संज्ञाष्टकोच्यते॥ तत्रप्रथमप्रयोगो नादिमुखं श्राद्धं
कृत्वाग्निः पश्चादुपविश्य प्राणायामादि कृत्वा परमेश्वरप्रीतये अष्टकाकर्माहं करि
ष्ये॥ इति संकल्पं कृत्वा पर्ववद्वैकल्पिकांत्स्मृत्वाघारादिकं स्मरेत्॥ त्रिंणि श्राद्धसारस्यादिनं
त्रजातस्य याज्ञवल्क्यऋषिः त्रिं० लिंगोक्ता देवता॥ अष्टमस्यानुष्टुब्वा होमे वि नियोगः॥
ततो देवताभिध्यानं॥ ततच प्रजापतिं। इंद्रं। अग्निं। सोमं। स्वस्त्यः रात्रिं। अष्टकां॥ रात्रीं।
रात्रीं। रात्रीं। रात्रीं। रात्रिः एता आज्येन॥ पृथिवीं। अंतरिक्षं। दिवं। दिशः प्रदिशः॥

आदित्या:। अहोरात्रे। आपः। मरीचीः धातारं। समुद्रं। ब्रह्माणं। विश्वान्। आदित्यान्वसू
न्। देवान्। रुद्रान्। गोपून्। मरुतः। प्रजापतिं। परमेष्ठिनं॥ अष्टकां वरुणां इंद्रमग्नीप
न। आग्निं स्विष्टकृतं स्थालीपाकस्योपशेषेण॥ न्यग्रादीनूर्ध्ववत्॥ एता अंगप्रधा
नार्थ देवता अस्मिन्कर्मण्यष्टकायां स्युः॥ इत्यष्टका ब्रह्मवरणादि कृत्वा तंडुलानंतरं सिद्ध
स्यापूपस्य आसादनं प्रोक्षणं च नैवेद्यं॥ ततआज्यभागांतं कृत्वा ज्यनेव त्रिंशद्धामस्वसा
35 रइत्याद्ये दशाहुतीर्जुहुयात्॥ ॐ त्रिंशद्धामस्वसा रउपयंति निष्कृतिं समानं केतुं प्रतिमुंचमानाः॥
ऋतूंस्तन्वते कवयः प्रजानतीर्मध्ये छंदसः परियंति भास्वती स्वाहा॥ इदं त्रिंशत्स्वसृभ्यो न मम॥ ॐ
ज्योतिष्मती प्रतिमुंचते नभो रात्री देवी सूर्यस्य व्रतानि॥ विपश्यंति पशवो जायमाना नानारूपा मातु
रस्या उपस्थे स्वाहा॥ इदं रात्र्यै न मम॥ २॥ ॐ एकाष्टका तपसा तप्यमाना जजान गर्भं महिमान
मिंद्रं॥ तेन दस्यून्व्यसहंत देवा हंतासुराणामभवच्छचीभिः स्वाहा॥ इदमष्टकायै न मम॥ ३॥
ॐ अनानुजामनुजां मामकर्त सत्यं वदंत्यन्विच्छ एतत्॥ भूयासमस्य सुमतौ यथायूयमन्या वो
अन्यामति मा प्रयुक्तः स्वाहा॥ इदं रात्रीभ्यः॥ ४॥ ॐ अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठा

मनुजार म१

न विद्द्विगाधं॥ भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा॥ ५॥ इदं
रात्रीभ्यः॥ ॐ पंचव्युष्टीरनु पंच दोहा गां पंचनाम्नीमृतवोनु पंच॥ पंच दिशः पंचदशेन
क्लृप्ताः समानमूर्ध्नीरधि लोकमेकं स्वाहा॥ ६॥ इदं रात्रीभ्यः॥ ऋतस्य गर्भः प्रथमा व्युषु
ष्यापामेकां महिमानं बिभर्ति॥ सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नियच्छ
ति स्वाहा॥ ७॥ इदं रात्र्यै न मम॥ ॐ या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे॥ सा नः पयस्वती
धुक्ष्वोत्तरामुत्तरां समां स्वाहा॥ ८॥ इदं रात्र्यै न मम॥ ॐ शुक्रऋषभा नभसा ज्योतिषा
गाद्विश्वरूपा शबलीरग्निकेतुः॥ समानमर्थं स्वपस्यमाना बिभ्रती जरामजर उषआगाः॥ आ
स्वाहा॥ ९॥ इदं रात्र्यै न मम॥ ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानां॥ एकासती
ती बहुधोषो व्यौच्छत्सा जीर्णा च त्वं जरयसि सर्वमन्यत्स्वाहा॥ १०॥ इदं रात्र्यै न मम॥ ततः स्था
लीपाकमभिघार्य तन्नयतस्त्व आहुतीः शान्ता पृथिवी स्याद्यष्टकां ताजुहुयात्॥ शान्ता

॥३

पृथिवीद्यौरमंतरिक्षं नौ द्यौमन्मयं कृणोतु॥ यं लोदिशः प्रदिश आदिशो नो दिशा
त्रे कृणुतं दीर्घमायुर्व्यश्नविस्वाहा॥ इदं पृथिव्यै भूम्यै यद्दिवे दिग्भ्यः प्रदिग्भ्यो दिशाभ्यां च
नमम १॥ ॐ आपो मरीचीः परियां तु सर्वतो धाता समुद्रो अपहं तु पापं॥ भूतं भविष्यद् कृतद्धि
श्वमस्तु मे ब्रह्माभिः गुप्तः सुरक्षितः स्याम् स्वाहा॥ इदं मरुद्भ्यो मरीचिभ्यो धात्रे समुद्रा
य ब्रह्मणे च न मम २॥ ॐ विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च संतु॥ ॐ प्रजा मम
तं दीर्घमायुः प्रजापतिः परमेष्ठी दधातु नः स्वाहा॥ इदं विश्वेभ्य आदित्येभ्यो वसुभ्यो देवे
भ्यो रुद्रेभ्यो गोप्तृभ्यो मरुद्भ्यः प्रजापतये परमेष्ठिने च न मम॥ ३॥ ॐ अष्टकायै स्वाहा
इदं ०४॥ अथ पूपमभिघार्य तेनैकाहुतिः॥ ॐ इन्द्राय स्वाहा॥ इदं १॥ ततः स्थालीपाका पूप
शेषेण स्विष्टकृत्॥ ततो भूरादि नवकं प्राशनादि विमोकांतं च पूर्ववत्कुर्यात्॥ ॥इति प्र ३८
थमाष्टकाकर्म॥ ॥अष्टकाया द्वितीयस्यां परेद्युः पिंडपितृयज्ञवदन्वष्टकाकर्म कुर्वीत॥ तत्क्रमा

मयिदु

36

तर्यविद्यमानायां भवति॥ तत्रनिर्णेजनांतं वैश्वदेविकं कृत्वापमाल्को प्राचीनावीती नीवि
बंधनं कृत्वा॥ अग्नेः परिस्तृतोवस्त्रादि कृत्वउदग्द्वारे परिवृते दक्षिणामुखः कर्मैतत्कुर्यात्॥
प्राणायामादि विधाय परमेश्वरप्रीतये अन्वष्टकाकर्म अहं करिष्ये॥ इति संकल्पं कृत्वा वैक
ल्पिकान्स्मरेत्॥ तत्राग्नेःपश्चात्पात्रासादनं॥ वरूग्रहणं पश्चाल्लेखाकरणं॥ एतत्रेइति
पिंडदानं॥ सूत्राण्याच्छादनानि॥ एतान्वैकल्पिकान्पदार्थानाहंकरिष्ये॥ इत्संकल्प्य कृ
ष्यादिकं स्मरेत्॥ अग्नये कव्यवाहनायेत्यादि सर्वमंत्राणां प्रजापतिऋषिः अग्नये कव्यवाहना
य सोमा। पितृमते द्वयजूंषि॥ लिंगोक्ता देवता होमे विनियोगः॥ अपहता असुरा इत्यस्यासुरा
रक्षांसि देवता यजुः लेखाकरणे वि०॥ येरूपाणीत्यस्य कव्यवाहनोग्निर्देवता त्रिष्टुप्छंदः॥ उल्मु
कनिधाने वि०॥ अत्रपितर इत्यस्य पितरो देवता बृहती छंदः उपवि०॥ नमोवइत्यादीति लिंगोक्ता
देवता निषद्द्य यजूंषि एषां नमस्कारकरणे वि०॥ नमो वः पितरो नमो वइत्येकेन पितृदेवत्यं
यजूंषि अनयोः षडंजत्यतिरिक्ता नमस्कारलिंगाद्यजमानेस्यैव निरंजनं नमस्कारे

विनियोगः॥ [illegible] नेपितृदेवत्येयज्ञकर्मणि॥ यजमानस्येवज्रपेवि०॥ प
तद्वाद्यन्तेपितृदेवत्यांयज्ञः स्वधादानेवि०॥ आधत्तेत्यस्य पितरो देवता गा० मध्यमपिं
37 डप्राशने वि०॥ ऊर्जं वहन्तीरित्यस्यापो देवता॥ वि० अपांनिषेके वि०॥ अथवा
सर्वेषांपिंडपितृयज्ञकृतौ वि०॥ देवताभिध्यानं॥ तत्राग्निं कव्यवाहनं सोमं पि
तृमन्तं मांसेन॥ पायसेनवा॥ चरुणावा॥ अमुकगोत्रं अस्मत्पितरं अमुकश
र्माणं॥ गोत्रं पितामहं शर्माणं॥ गोत्रं प्रपितामहं शर्माणं॥ मांसपिंडैः पा
यसपिंडैर्वा चरुपिंडैर्वा॥ अमुकगोत्रं अस्मन्मातामहं प्रमातामहं वृद्धप्र
मातामहानां मांसाद्यान्युतान नवासुरासंख्यादिदैवैः आवायदित्वा पिंडै-
रहंयक्ष्ये॥ आग्नेयादिदक्षिणांतं दक्षिणाग्रैर्दर्भैः पवित्रस्तरणं अग्निमपर ३१९

पोत्रे स्वापात्रासादनं॥ तत्र प्राक्संस्थानि दक्षिणाग्राणि। प्राग्बिलानि पश्चिमासा
दने॥ दक्षिणसंस्थानि प्रागग्राणि दक्षिणाबिलानि॥ उत्तरासादने स्युः अत्र पक्षे
मांसं। पक्षे तंडुलाः तयोरतिदिष्टग्रहणं अग्रहणं चैव वचवारः पक्षा भवंति॥ तत्र तं
डुलानां ग्रहणपक्षे॥ स्फ्यमुलूखलं मुसलं शूर्पं चरुस्थालीं उदकं पायसपक्षे उद
कस्थाने पयः॥ आज्यं मेक्षणं वज्रं उपदपात्रं लक्ष्कद्वौ छिंनानि॥ अनवखंडितास्तंडु
लाः॥ अन्यतमा सुरा सकवः। अंजनं अनुलेपनं स्रजः स्रुचाद्यन्यतमं च। मांसस्य ग्रह
णपक्षे तंडुलस्थाने सव्यपार्श्वसक्थ्योर्मांसं नोलूखलादितत्रासादनं तत्र स्वस्थालीउद
कमित्यादि॥ अनयोरग्रहणपक्षे स्थाल्यादिन्योवमासाद्य॥ पक्षे सुवितंडुलानां ग्रह
णपक्षे नसंस्कृतत्वीकरणं चरुस्थाल्यामावपनं। पक्षे अवखंडितस्य मांसस्य स्तुवि
ग्रहणं। स्थाल्यामावपनं॥ पक्षे अवखंडितस्य स्तुविग्रहणं॥ स्थाल्यामावपनं॥ अग्रह

णापदे तंडुलानां मांसस्य वा स्थाल्यामावपनमेव॥ उदकासेचनं दुग्धासेचनं वा॥ अ
धिश्रयणम् अवघ्राणं॥ स्रुतस्याभिघारणं॥ दक्षिणात उद्वासनं॥ बर्हिष आहरणं॥ सोप
ग्रहं हृदि सव्यं न्यस्य दक्षिणं जान्वाच्य॥ अग्नये कव्यवाहनाय स्वाहेति मध्ये मे
क्षणेन जुहुयात्॥ ततः सोमायेति ततो प्राग्भूतेन प्रक्षेपः॥ अथवा पूर्ववद्देवहो
38 मः॥ ततो लेखाकरणं॥ कृत्वैव गणसंख्यया विनैकेन मांसेन पायसेन चरुणा वाश्र
त्तात् पितृस्यान्यपि त्र्यादिभ्यः पिंडदानं॥ एतत्ते मांसमिति वा मांसपक्षे॥ ततः प्रत्य
ग्वामात्रादिभ्यो लेखाकरणं॥ उल्मुकनिधानं पूर्ववत्॥ अमुकगोत्रे अस्मिन्मा
तुः अमुके दे॥ अवनेनिक्ष्वेत्यवनेजनं॥ पितामहि प्रपितामहीति इतराभ्यां स
कृदाच्छिन्नान्युपस्तीर्य॥ गोत्रे अस्मान्मातरमुके दे एतत्ते मांसमन्नं वा॥ इदं गोत्रा ३०
ये नमः॥ एवमितराभ्यां मात्रादिपिंडसंनिधाववनेपयेभ्य आचार्यस्त्रियेभ्य इ

च्छया लेखोल्मुकवर्ज्जं दत्वा ॥ मात्रादिपिंडत्रयसमीतत्समावटत्रयं खात्वा ॥ तेषु पूर्वव
ज्जोत्रादिनिर्दिश्यामुकिदं ॥ सुरां पिबतिक्रमेण गुडोदकानि रुतां सुरामेके नैवपा
णिनोपसिंचेत् ॥ तथा वा मुद्दें किंचत्प्यस्वेति तत्रैव सक्तुप्रक्षेपः ॥ एवमांजस्वेति अंजन
दानं पिंडेषु ॥ अनुलिंपस्वेत्यनुलेपनं च ॥ स्वजोपिनह्यस्वेति ॥ स्रजश्च ॥ एतत्सुरादि
दानं मातृष्वेव ॥ अत्र पितर इत्यादि स्त्रवदानादर्वाक् पूर्ववत्तोत्रेणैव कुर्यात् ॥
प्रत्यवनेजनं सर्वत्र ॥ सूत्राद्यं न्यतमदानं प्रतिपिंडमुन्नयत्र । वास्योपिंडपूर्वकं वा ॥
अवनेजने शेषोदकं निषिक्तः ॥ सकृत्सत्कृत्त्व नयत्र पिंड मूले प्राचूषट् पिंडाश्चरूपा
त्रप्रत्यवधाय वा जिघ्राय गोसकृदाछिन्नानि उन्नयानि सह वाम्याधायोल्मुके चापि
विसृज्य यज्ञोपवीती भूत्वा यम्य मातृविसर्जनं कृत्वा स्मृत्युक्तविधिनान्वष्टक्यं श्राद्धं कु
वीत ॥ ॥ ॥ इति अन्वष्टक्यं कर्म ॥ ॥ अथ पौषमासस्य वैश्वदेव्यष्टकाकर्मोच्यते ॥ तच्च गोप
शुस्थालीपाकमांसेन भवति ॥ तस्य च देशकाल विरुद्धत्वात्पायसेन वा चरुणैव चैतत्स्यात्

तत्रप्रथमप्रयोगे मातृपूजनपूजनपूर्वकमाभ्युदयिकं श्राद्धं कृत्वा प्राणायामादि परमेश्व
रप्रीतये द्वितीयाष्टकाकर्माहं करिष्ये॥ इति संकल्पादिकं कृत्वा॥ प्रथमाष्टकावत्॥ इंद्रस्त्वा
विश्वान्देवान्यायसेन चरुणा वैश्यभिध्यायेत्॥ इंद्रयज्ञोपस्थादिकर्नवदानयोरष्टकावत्॥
अनंतरमासादनादिविधिना अष्टकाकृत्यं ते पायसं चरुं वाभिर्घार्य॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा॥
39 इदं विश्वेभ्यो देवेभ्यो न मम॥ इति कृत्वा नयत्रोषा स्विष्टकृत्॥ अन्यत्सर्वं पूर्ववत्॥ एवमेव मा
घस्य प्राजापत्याष्टकासिद्धकालकत्र॥ कचरुणा॥ तत्राष्टकानंतरं प्रजापतिं कालकत्रा के
नेत्यभिध्यानं मह्यानसम्मूला गव्यं त्रामु हृत्य कालकत्रा कचरुं पक्काष्टकाचरुतंडुला
नंतरमासाद्य प्रोक्षेत्॥ अष्टकाकृत्यं ते प्रजापतये स्वाहा॥ इदं प्रजापतये न मम॥ इति त्रा
काकृतिः॥ ॥उन्नयत्रोषा स्विष्टकृत्॥ अन्यत्समानं॥ एवमेव चतुर्थ्यां नाडपदपेज्य
ष्टका॥ अष्टकांते पिन्द्रन्त्॥ शाकेनेत्यभिध्यानं तंडुलानंतरं शाकमासाद्याघास्य ३९
चरुस्थाल्यां तंडुलान्प्रक्षिप्य द्वितीयस्यां स्थाद्कायां शाकं प्रक्षिपेत्॥ एवं ऽऽ

वसुधर्मेत्र॥ कंपत्काष्टकाकुर्यानंतरं पितृभ्यः स्वाहा॥ इदं पितृभ्यो न मम॥ इति स्थाकाकु
तिः॥ एतस्य स्थाकचरोराहसादनादिहोमांतं प्राचीनावीतिना कर्त्तव्यं॥ ततदनंतरं यज्ञो
पवीत्युपस्पृश्योत्तरं विदध्यात्॥ स्विष्टकृतादिपूर्ववत्॥ सर्वात्रान्वष्टकुरन्वष्टका
कर्मचियथोक्तस्यात्॥ सर्वत्र प्रथमप्रयोगे अष्टकामष्टकां प्रतिमात्रादिकं कुर्यात्॥
॥ ॥इत्यन्वष्टकाकर्म॥ ॥अथवृषोत्सर्गः॥ सवगयासाम्याघनेकफलदर्शनात्॥ पि
तृभिः स्वर्गावाप्तिः पापक्षयेपरमेश्वरप्रीतिसंतत्यादिकामेन कार्त्तिक्यादौ कर्त्तव्यः॥
तत्र गोष्ठे गवां मध्ये॥ नदीतटवने त्रिवाळ्ये स्वगृहेपिवान्यत्र वसुचोरम्यमंडपे
वा प्रागुदक्प्रवणे देशे॥ यथावदावसथ्याग्निं संस्थाप्य मत्स्यपुराणाद्युक्तप्रकारे
णा सलक्षणा याः पयस्विन्या गोर्वत्सनेकवर्णयथोक्तलक्षणं नीळमेकं चद्विवर्णंवा
षण्मासोर्ध्वं वर्षत्रयादधिकं यथाविधाभिरष्टाभिश्चतसृभिर्वा वत्सतरीभिरलं
ने द्वाभ्यांन्वितमीशानादिष्युपकल्प्य मत्स्यपुराणादिश्राद्धं च विधाय॥ एतेषामन्य

तमेनो दृष्टेन ततो देवतापूर्वकं वृषोत्सर्गमहं करिष्ये॥ इतिप्रतिज्ञाय स्वच्छपल्लवमुखं र
त्नादिगर्भं गंधोदकपूरितं वस्त्रपुष्पस्रङ्मंडितं सलक्षणं कुंभं ईशान्यादिशि धान्यपुं
ज्जोपरि विन्यस्य तत्र शिवमावाह्याभ्यर्च्य॥ प्रकृतवैकल्पिकानंतरं एकवर्णां वृषड
इतिस्मरेत्॥ ताताभिध्यानं॥ षट्कौग्निं॥ प्रजापतिं॥ इंद्रं॥ अग्निं॥ सोमं॥ एतादेवता
आज्येन॥ अग्निं॥ रुद्रं॥ शर्वं॥ पशुपतिं॥ उग्रं॥ अशनिं॥ भवं॥ महादेवं॥ ईशानं पायस
चोरुशेषेण॥ ततो भस्मादीन्॥ शेषमाज्येन॥ पूर्ववत्स्मर चाषादिकं स्मरेत्॥ इहरति
40 रिति देवा ऋषयः यजूंषि उपस्थजनि सुष्ठिकं छंदः अग्निर्देवता॥ सद्योजातेन वि०॥ पूषागाइ
ति मंत्रस्य गौतम ऋषिः पूषा देवता॥ गा० रोमे वि०॥ भस्मादीनां पूर्ववत्॥ रौद्राध्यायस्य पर
मेष्ठि ऋषिः मानो वध ये इमा रुद्राय ते त्रयं त्रयस्य कुत्सो वा नमस्ते रुद्र इति गायत्रीयात इति
तिस्रोनुष्टुभो नो ध्यवो वदिति तिस्रः पंक्त्यो नमोस्त्विति सप्तानुष्टुभो मानइति द्वे जगत्यौ॥ ४०
षोडशानामेक रुद्रो देवता॥ हिरण्यबाहव इति त्रिंशत्साद्यजूंषि सप्ताष्टकाद्वद्विन

स्त्रयोविंशतिरष्टकाजाताएवमुन्नयतोनमस्काराअंन्येन्यतरतोनमस्काराश्चतिस्रो
न्नातयोरुद्रास्तेषांदेवता॥किरिकेत्यादीनांपंचानांव्याहृतीनांदेवहृदयन्नताअ
ग्निवाय्वर्करूपाअनिरुक्ताः पंचचत्रविंशतयोरुद्रादेवताः॥द्रापेइत्यतीयाजगतीयात
नुष्टुप्परीणोमीढुष्टमेत्यत्रत्रिष्टुन्नोविकिरिद्रसहस्राणीतिचानुष्टुन्नोसद्मानामेकर
द्रोदेवता॥असंख्यातादिदशानामेवतानामनुष्टुनांदशत्रिकारुद्रादेवतानमोस्त्विति
त्रयाणांशत्यवरोहाणांयजुषांत्रयएकादशारुद्रादेवताएवंसाग्रंशतचतुष्टयंरुद्रादे
वताः अथवाशतशीर्षैवसर्वस्यदेवताहोमेविनियोगः॥हिरण्यवर्णादिनांसावित्र्यपम
र्षिणांतानांवाएनंयुवनमितियाज्ञवल्क्यऋषिः त्रि० छंदो देवता तदुत्सर्गेविनियोगः॥न
न्नरित्यादिनांयजुषांदेवाऋषयः वायुर्देवताहोमेवि०॥यास्तेअग्नइतित्रिचस्यदे
वाऋषयः अनु० मध्यमायांइन्द्राग्नीदेवतेहुतयोरग्निर्देवता॥तचायामितिशुनःशेप

ऋषिः त्रि० वरुणो० स्वर्णघर्म इत्यादीनां पंचानां यजुषां देवा ऋषयः अग्नि० रुद्रान् इत्यादी
होमेन०॥ सद्वीरं श्रपणीय तंडुलानां नरं सिद्धस्य पोष्ठस्य आसानेदने प्रोक्षणं च॥ इंद्र यद्भवत्पायें
संश्रपयित्वा पर्युक्षणां तं कृत्वा अन्वारब्धे ब्रह्मपं च ब्रह्मषं सदा इन्द्रादशा होरे: स्वाहांतैर् इत्यादिमं
41 त्रैः षडाकुतीर्जुहुयात्॥ तास्विदमग्नये त्यागः॥ ततस्त्वाघारावाज्यभागौ चान्वारब्धे॥
ततः पायसमभिघार्यान्वारब्धे ग्नये स्वाहेत्याघारदेशे वपोष्ठांतोः॥ तत्राग्नये स्वाहा
एवं रुद्राय स्वाहा॥ उदकोपस्पर्शनं॥ शर्वाय। पशुपतये॥ उग्राय॥ अशनये॥ भवाय॥
महादेवाय॥ ईशानायेति नवपायसेनाज्य यथा दैवतं त्यागः॥ ततः पोष्ठमभिघार्य॥ उंपूष
भागा अन्वेतु नः पूषारक्षतु सर्वतः॥ पूषा वाजं सनोतु नः स्वाहा॥ इदं पूष्णे न मम॥ २३
इत्येकाहुतिः सर्वेण पोष्ठेन॥ ततान्वारब्धे पायस पोष्ठ शेषेण॥ स्विष्टकृत्॥ ततो मह ४१
रा घाराश्चाज्येन पूर्ववत्॥ प्रणीता विमोकांते कुंभे रुद्राजपी त्वादि हुतशेषं बलिं दत्वा॥ वा
मकुक्षि चक्रे दक्षिणां त्रिशूलं मिति॥ शूद्रस्य तु विपरितं। वत्पायसेन कुंकुमेनापि

वांकितं वृषभं वत्सतरिसहितं हिरण्यवर्णेतिति सृभिरापोहिष्ठेतिति सृभिः शंनोदेवीरित्यष्टा

भिर्मंत्रैः कुंभांभोभिः स्नापयित्वा ग्निसमीपयोरंतरतः त्रीं वंवत्सतरीमध्ये स्थितं गंधपुष्पवा

सोभिः किंकिणीघंटादीना चैलैरे कंठे श्वंगा खुरं खवेश्वकं ठस्य कं कणांवघारू ऊर्ध्वनु

रूपस्क कंठेकूष्मांडीभ्यो चायामिष्टगा विचार्य सो सावित्री मध्यर्षां चेति॥ मंत्रान्वृषभस्य दक्षि

णेवामेवा कर्णेजपेच्च॥ वत्सतयोरूपवत्यः पतिं वो बालिनं शुभं॥ ददामितेन सहिताः क्री

डंतं वृषमासा इति वत्सतरीणां कर्णे जपेत्॥ वृषोयं भगवान्धर्मश्चतुष्पादः प्रकीर्तिताः॥

वृणोमि तमहं भक्त्या समारक्षतु सर्वत इति वृषभमभिमंत्र्यैनं युवानं वृषभं ददामि गवां प

तिं यूथपतिं सस प्रि॥ अनेन सार्द्धं चरत स्वप्रकामं तथाप्राप्नुत वत्सतर्य इति वत्सतरीमभिमंत्र्य

च॥ ततो लांगूलं समंतद्धि कार्य वृषभस्य वत्सतरीणां च पुच्छान्येकत्र धृत्वा वृषभस्यैव वा पुष्पा

क्षत हिरण्योदकपूर्णेनांजलिना॥ एवं युवानं पतिं वा ददामि तेन क्रीडंती श्चरत प्रियेण॥

मानः सप्रजऊनुषासु नगा रायस्पोषेण समिषामदेमेत्यनेनोदकप्रयोगं तेन वृषभम

मुत्सृजेत्॥ पितृदृष्टेन चेदपसव्येन॥ मयोभूर् अभिमाहि स्वाहा॥ मारुतोसि इत्यादिना स्वर्णाः
सूर्यः स्वाहेत्यंतेनानुवाकेन वृषोत्सर्गमभिमंत्र्य तत्पुच्छतिकोदकपूर्णताम्रपात्रे निक्षिप्य॥
स्वधा पितृभ्यो मातृभ्यश्च बंधुभ्यश्चापि तृप्तये॥ मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजा-
ः॥ गुरुश्वसुरबंधूनां ये कुलेषु समुद्भवाः॥ ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः॥
42 नरा ये चात्र तिष्ठंति पतिताः पितृबांधवाः॥ वृषोत्सर्गेण ते सर्वे लभंतां तृप्तिमुत्तमाम्॥ इत्यंज-
लिना दक्षिणाभिमुखः पितृश्च संतर्प्य वृषं प्रदक्षिणं परिक्रम्य धर्मोसि त्वं चतुष्पादश्चतस्र-
स्ते प्रियाः स्मृताः॥ एताहि पोषणार्थाय मया त्वं सृष्टाः स्वया सह॥ धर्मस्त्वं वृषरूपेण जगदा-
नंदकारकः॥ अष्टमूर्तेरधिष्ठानमतः शांतिं प्रयच्छ मे॥ इत्येतानेनुमंत्र्य कर्षणीं
रायसहितं सोपस्करं कुंभं वा कांस्यकरणानि सघृतं कांस्यपात्रं स्वाचार्याय दत्वा॥ ८२
क्षमाप्य त्रिप्रभृतीन् ब्राह्मणान् संयतान्॥ त्रिवव्रतधरान्वा यथाशक्ति पायसादिनान्ने-
विस्तरेणात्रिवांछितये॥ भोजयेच्चान्येभ्यो दक्षिणां च दद्यात्॥ वृषाकंरितारं तोषयेत्॥ ॥ ॥

॥इति वृषोत्सर्गः॥ ॥तदनंतरं कार्त्तिकमार्गशीर्षे वा शुक्लपक्षे पुण्याहे स्वगृह्यावृत्त्याग्निः कर्त्त-
व्यः अथवा पायसस्वरूपं तत्राभ्युदयिकं कृत्वा ब्राह्मणानाघातपरमेश्वरप्रीतये पायसप्रा-
नमहं करिष्ये इति संकल्पः॥ यावंत्यो गृहे गावो विद्यंते तासां पयसि एकस्या अपि गोर्दुल-
क्षीते पिवा महानसे उद्धृत्याग्निना चरुधर्मवद् मिहत्यामुखायां तंडुलैः पायसं श्रपयित्वा
तेत्रिप्रभृतीन्॥ ब्राह्मणान् भोजयित्वा तच्छेषं स्वनायं श्नीत॥ पितृपुष्टिका वृषोत्सर्गपाय-
सप्राशनं वृष्ट्यार्थं पाकयज्ञः॥ तत्संनिहितप्राप्तप्रथमेमासि न कुर्वीत॥ अनुत्सर्गपक्षे द्वि-
तीयाद्याद्दृत्तो वा श्वयुजपां वृषोत्सर्गे क्रियमाणे दृष्टातकाकर्मानंतरं सह कर्त्तव्यः॥
इति पायसप्राशन समाप्तः श्वपाकयज्ञः॥ ॥अथोपासने प्रायश्चित्तं विधिं व्या-
ख्यास्यामः॥ अरुणोदये उच्छायाग्निं प्रादुष्कृत्य दंतधावनादि पुरःसरं यथावि-
धिः स्नायात्॥ अल्पकालत्वाद्दशकौ संक्षेपतः स्नायात्॥ ततो यथाविधि संध्यां
निर्वर्त्य॥ कालत्पलक्षो दर्शविदग्ध्यंति॥ ततः प्राणायामसंकल्पविकल्पाषादि सम-

रणा देवताभिध्यानानि विधाय यथाविधि प्रातर्होमं कुर्यात्॥ अर्घ्यांता चेत्संध्या
स्ति कृता तर्हि गायत्रीजपं तत्संकल्पो विधायोपस्थानं कुर्यात्॥ उपस्थान विषये अ
अनुदय नियमो नास्ति॥ अथात्र प्रायश्चित्तं वक्ष्यते॥ अग्निस्थाने सूर्याहुतिः सूर्यस्था
43 ने अग्न्याहुतिः एवं विपर्यासे अत्र संकल्पादि द्रव्यांतरेण होम आवर्त्तते॥ यदि प्रथमाहु
त्याहुतिर्हुत्वा तर्हि उपयमनादि आवर्त्तते। उपस्थान लोपे प्राणायामत्रयं॥ अनुदित मं
ति होमे कृते प्राणायामत्रयं॥ औपासन रहितस्य उदयानंतरं संकल्पपूर्वं ब्रह्मयज्ञः।
अथवा नित्यस्नानवेळायां उपासनीनां विश्वदेववेळायामेव कर्त्तव्यः॥ तत्र संकल्प र
हितः प्राणायामरहित एव पंचयज्ञार्थं सर्वार्थं वा उद्देश्य महानसे पाकः॥ कार्यः॥ न कुंडे ४३
स्यापरि॥ अनेक पाक संभवे सति पंच यज्ञ शेषान्नं दीप म स्वगृहे आवसथ्याग्निप २५
क न कार्यं। शूद्र पतित रजस्वला वर्ज्यं॥ तयोः पंचयज्ञात्पूर्वं मन्नभोजनं॥ अन्नभोजनं
तु बाला पत्या रोगिणी गर्भिणी रोगिणां वर्ज्यमिति शेषाणां भोजने नियमाः॥ असा
मर्थ्ये कालापकर्षः कार्यः॥ अथ पंचमहायज्ञाः उक्ता तेनान्ने

नकार्यः ॥ तत्रचप्रक्षालनं ॥ उद्धृतां न्नप्रोक्षणं तद्दा आप्यायनं ॥ पर्युक्षणं विना आकृती
मात्रे कृते प्राणायामादि पुनः क्रियां आकृति विपर्यासे तथैव ॥ आकृति लोप बलि
लोपिपि प्राणायामत्रयं ॥ पंचयज्ञ विपर्यासे प्राणायामत्रयं ॥ देवयज्ञः ॥ सप्तखंडहु
तयज्ञः ॥ मार्त्तिकबलिः ॥३॥ द्वारबलिः ॥२॥ वायुबलिः ॥४॥ दिग्बलिः ॥४॥ मध्यमब
लिः ॥३॥ उत्तरबलिः ॥२॥ अपरन्हुतबलिः ॥२॥ खंडविपर्यासे प्राणायामत्रयं पुनः ॥
क्रिया ॥ तद्दा बलि विपर्यासे विष्णुस्मरणं ॥ इदं विष्णुरिति ॥ पैत्रो बलिः ॥ नित्यश्राद्ध
मिति पितृयज्ञस्तस्य विपर्यासे प्राणायामत्रयं पुनः क्रियते ॥ एतेषां पंचयज्ञानामे
केकस्याकरणे उपवासः प्रायश्चित्तं ॥ उपवासाशक्तस्य गायत्र्याः सहस्रजपः ॥ अ
थवा ब्राह्मणभोजनं ॥ अथवा द्वादशप्राणायामः ॥ तथा च स्मृत्तं ॥ उपवासस्त्वगा
यत्र्याः सहस्रं विप्रभोजनं ॥ प्राणायामद्वादश द्वौ चसमेतच्चतुष्टयमिति ॥ सव्यापसव्ये वा
अपसव्ये सव्ये ॥ प्राणायामत्रयं हुतकारणाति । थिभोजनादि विधापि पितृयज्ञ ॥ नृयज्ञ विपर्यासे प्रा

ण। यामत्रयं॥ एकस्य लोपे उपवासः। ब्रह्मयज्ञविपर्यासे प्राणायामास्त्रयः॥ एकनक्तत्रयं वास
र्वे लोपे अर्द्धकृच्छ्रः॥ रोपगापिंडानिमित्त लोपे द्रव्याभावे यथवा पादकृच्छ्रः॥ तस्य स्वरूपं॥ एकभ
क्तं च नक्तं च अयाचितं उपवासाश्चेति॥ अत्यंतापन्नो सर्वकरणे उपवासः॥ अनभिघारि
तं न होतव्यं॥ अभिघारितं मुख्यं गोघृतेन॥ अनंतरं माहिषेण॥ केचित्कुर्वंति तिलतैलं
न॥ पायसाद्दध्ना वा॥ दध्नाभावेनूदकेन॥ यत्राऽप्यभावः॥ तत्र एतैर्द्रव्यैः क्रिया कार्याः॥
उदकं विहाय॥ पंचयज्ञात्पूर्वं॥ दंपत्यो र्भोजने पंचयज्ञलोपः॥ पंचयज्ञात्पूर्वं स्त्री चेद्भोज
नं करोति॥ तर्हि तस्या उपवासः प्रायश्चित्तं॥ प्रमादाद्दिवा पंचयज्ञाकरणे सायं संध्याअ
नादिष्टं॥ ततः पंचमहायज्ञः॥ अनंतरं सायंहोमः॥ निर्णेजने विपर्यासे विष्णुस्मरणं॥
लोपे प्राणायामत्रयं॥ सायंहोमादि सर्वं प्रथमप्रहरपर्यंतं पंचयज्ञादि दिनाद्यांतं॥ ४४
दिवा पिंडयज्ञ दर्शश्राद्धं च॥ पश्चादि कर्म दिवसभ्रांत्या कृते तदकृतं॥ अस्तमनानंतरं नव
नाडिका होमकालः॥ अस्तमानपर्यंतं प्राच्यामस्य गौणकालः॥ सर्वत्र गौणकालः

55

भामे अनादिष्टं ॥ तद्यथा ॥ यस्यकर्मणोगौणाकालः ॥ तंनिमित्तंसंकल्पं रुच ॥ ततोनादिष्टं ॥ आज्य
निर्वापः ॥ अधिश्रयणं ॥ स्रुवस्य प्रतपनं ॥ संमार्गकुशैः संमार्जनं ॥ उद्वासनं ॥ पवित्राभ्यामुत्प
वनं ॥ अवेक्षणं होमः ॥ ॐ भूः स्वाहा ॥ भुवः स्वाहा ॥ स्वः स्वाहा ॥ चन्नः ॥ सचन्नः ॥ अयाश्चाग्ने
येतेशातं ॥ उदुत्तमं ॥ पूर्ववत्यागः ॥ एतत् अनादिष्टं श्राद्धे अभिधेयः ॥ गौणकालक्रमे लोपः ॥ लोपे
गायत्र्यासहस्रजपः ॥ एवं सायंहोमस्य ॥ प्रातःस्नानसंध्याकृस्नानसंध्यायाश्च लोपे प्रतिनि
मित्तं सहस्रगायत्रीजपः ॥ प्रातःसंध्याकालातिक्रमे स्नानं प्राणायामत्रयं गायत्र्यष्टोत्तरशतं जपः ॥
एतत्प्रायश्चित्तं सायंसंध्याकालातिक्रमे पुनर्मन एकां कंडिकां रुचं वा चमेत त्रिवस्य जपः ॥ एतत्प्राय
श्चित्तं ॥ सायंतनानां कर्मणामुदयाल्लोपः ॥ प्रातस्तनानामस्तमिते लोपः ॥ होमद्वयलोपे वैश्वानर
श्चरुः ॥ पक्षादिद्वयलोपे च ॥ नयादौ त्रिरात्रहोमलोपे तंतुमते चरुः ॥ ॐ पासनिनो ध्यापन प्रवृत्तौ
स्थापाकर्म द्वयलोपे वैश्वदेवद्वयलोपे वैश्वानरश्चरुः ॥ पिंडपितृयज्ञलोपे आहृताग्रयणस्य न
वान्नपाकभोजने पतितान्नभोजने अतिकृच्छ्रपूर्वको वैश्वानरश्चरुः ॥ पाणिस्तमिते नान्नेन प्राजा ॥

पत्यः अतिकृच्छ्रः॥ यवैर्वसंते व्रीहिश्यामाकैर्नीवारैः॥ शरदि अकृतस्याग्रयणस्याशेषाहनवान्नभोजने निषेकः॥
केचिन्मतं॥ पश्वादिकर्मसिद्धरां वैश्वानर इत्यादि विशेषः॥ वैश्वदेवान्नाभावः॥ आज्यभागानंतरं॥ अग्नये वै
श्वानराय स्वाहेति स्थालीपाकाहुतिः॥ तेनैव स्विष्टकृत्॥ एतदन्यत्समानं॥ अकृताग्रयणस्य नवान्नप्राशने
वैश्वानरस्य चरुः॥ अयमेव विशेषः॥ सर्वपदार्थविपर्यासे अनादिष्टं॥ परिसमूहनादि पंचपदार्थविपर्यासेपु
45 नर्यथार्थक्रमेणाकरणं॥ नादिष्टमिति॥ संस्रवहोमपर्यंतं ब्रह्मोपवेशनं॥ स्थालीपाकपर्यंतं प्रणा
यनं॥ आज्याहुतिपर्यंतं परिस्तरणं॥ स्वीयकार्यपर्यंतं पात्रासादनं॥ आ प्रोक्षणपर्यंतं पवित्रक
रणं॥ पर्युक्षणपर्यंतं प्रोक्षणीसंस्कारः॥ स्रुवकर्मपर्यंतं पात्रप्रोक्षणं॥ होममात्रार्थमाज्यसंस्कारः॥ हो
मार्थमेव स्रुवसंस्कारः॥ तथा उपयमनादानं समिदाधानं पर्युक्षणं॥ प्रधानाहुतिमात्रार्थं॥ आघा
रावाज्यभागौ॥ आज्यव्यतिरिक्तेन हविषा प्रधानहोमः॥ तत्र प्रधानाकरणे तदनंतरं पुनः स्थालीपा ५५
केन प्रधानहोमः॥ प्रधानहोमे जाते आज्याहुतिरपि॥ स्विष्टकृदावर्तते॥ प्रधानाहुतिविपर्यासेपु
नरपि यथाक्रमेणाकरणं॥ पूर्वोक्तिसर्वनिमित्ते अंगाहुतिलोपे विपर्यासे संस्रवाकरणे तदनहोम
पावनं॥ वरदानब्राह्मणभोजनबलिलोपे एतेषां प्रत्येकमनादिष्टं॥ शावाग्निस्मृतकाग्निपतिताग्नि

अंत्यजाग्नीनांसंसर्गेअग्निनादिष्टं।।प्रज्वालनं।।समिंधनं।।ताॐसवित्रः" तत्सवितुः।।विश्वानिदेवसवितरित्येतैः
प्रज्वालनं।।पुनस्त्वेतिसमिंधनं।।अन्येनाग्निनासंसर्गेसमिंधनमेव।।अरणौमंथनेक्रियमाणेग्निसंभ
वेजातेसत्यसपवर्ज्यांत्यान्यस्थानेमंथनादग्न्युत्पत्तौपूर्वस्थानेग्निदर्शनेजातेसतिजनयाग्न्याग्निन्म
यपालिकयोग्रहणंकृत्वाउत्तरमंथनसंभवाग्निंप्रदीप्तंकृत्वापालाशादियज्ञियवृक्षसमिधांद्वा
दशांगुलांगृहीत्वासमितउसंकल्पेतामितिऋग्भ्यांउत्तरमंथनसंभवाग्नौप्रागग्रांक्षिपेत्।।पंचभू
संस्कारपूर्वकंपूर्वमंथनसंभवमग्निंस्वस्थानेनिधायोत्तरमंथनसंभवाग्निंशांतंकुर्यादिति।।
रजस्वलादिनचतुष्टयमनधीकारिणी।।सूतिकापुत्रजननीसाविंशतिदिनानि।।यास्त्रीप्रसूता
सामासेन।।तावत्पर्यंतंतस्याः त्यागदानेनाधिकारः।।रजस्वलायापत्न्यांयाजमानेनप्रवासोनकार्यः।।
यदिप्रवासंकरोतितदापुनराधानं।।तद्वत्सूतिकायामपिपत्नीचविरजस्कायदाभवतितदापाकंक
रोति।।दशाहाद्र्ध्वंप्रोषितसतिनित्यंनकुर्यात्।।नैमित्तिकश्राद्धंवर्जयित्वा।।सूतिकायांपत्न्यांअग्नि
धारणंकर्तव्यं।।सायंप्रातर्होमः।।पक्षादिकर्मपिंडपितृयज्ञान्वर्जयित्वान्यमपिक्रियते।।द्वादशारा

त्रीर्विकल्पः॥ निवृत्तिपक्षे ऽग्निधारणमेव॥ यद्यऽग्निर्नष्टो भवति तदा पुनराधानं॥ अन्यथा पाकनियमः॥ हो
मस्वीकारपक्षे होमाकरणे पाकस्थलीलोपे पुनराधानं॥ अ… स्वीकारे होमादिकरणे पुनराधानं॥ सूतके
सति पंचयज्ञानामवश्य निवृत्तिः॥ पाकार्थमुद्धृतस्य पाके कृते पुनः संसर्गः॥ पाकार्थमुद्धृतस्य पाके क्रियमाणे
सूतके वा जाते मृतके वा जाते॥ असगोत्रेण पुनः संसर्गः॥ होमपिंडपितृयज्ञः पक्षादिकर्म कार्यं॥ संक
46 ल्पत्यागो यजमानस्य पत्न्याश्च तस्यास्त्वनधिकारे त्यागदानं नास्ति॥ सपिंडसंबंधी नामंत्रो वेपि
प्रवासनिवृत्तिः॥ मातापितृमरणे॥ अथवा गृहे सपिंडकमरणे॥ अग्नावसगोत्रेण पाकः कार्य एव॥ अ
ग्निशुश्रूषा च॥ सपिंडो भस्मना काष्ठकेन गृह्णाति॥ दर्शश्राद्धलोपः॥ सांवत्सरीकं आपरपाक्षीकं वा नष्टो वांते
सपिंडेन भस्मणीकप्रक्षालनं॥ मंत्रेणोदकप्रक्षेपः॥ दशाहमध्ये उदकक्षये जाते असगोत्रेण मंत्रवर्जं कुळ
प्रक्षेपः कार्यः॥ सूतके वर्तमाने अनादिष्टप्राप्तोसति॥ असगोत्रेण कारयेत्॥ आधाने वर्तमाने असमा ४६
प्तौ पत्न्यां रजोत्पत्तिः सूतके वा मृतके जाते पंचमदिने आज्ञौ वांते आभ्युदयिकादि सर्वकार्यं॥ अनेन जातसू
तक मृतक रजस्वलात्वे वा तदा अग्निमुपसमाधाय अग्निधारणं शुद्धिपर्यंतं कार्यं॥ ऊ॥ कळौ विश्वदेवः॥ अधि
कार जाते सति ब्रह्मोपावरणादि आधानं सर्वं क्रियते॥ शुद्धो सत्यां भस्मणिका धानं कार्यं॥ इति पक्षः॥ परंत

आधाने क्रीयमाणे पत्न्या रजोत्पत्तौ सूतके मृतके वा प्राप्ते ब्राह्मणातर्पणात्पूर्वं आधानमावर्त्तते
तथा चोक्तं॥ अर्वाक् ब्राह्मणातृप्तेश्चेदाधाने स्त्री रजस्वला॥ आवर्त्तते तदाधानं॥ मातृपुजासमन्वितमिति वचनात्॥ आधानविपर्यासे पुनरावृत्तिः॥ नानादिष्टमिति॥ प्रथमाधाने आभ्यु
दयिकमादौ कृत्वा ब्राह्मणाल (पदार्थ) दिपर्यंतं पदार्थानां नाशे विपर्यासे वा पत्न्या रजोत्प
त्तौ सूतके मृतके वा जाते आभ्युदयिकादि सर्वमाधानमावर्त्तते॥ ब्राह्मणातृप्तौ अनंतरं सू
तकाद्याप्तौ शुद्ध्यनंतरं मणिकावधानादि कार्यं॥ ॥अथ प्रवासधर्माः॥ ॥प्रवासस्थितेन यज्ञ
मानेन तद्दिङ्मुखोपविश्य॥ प्राणायामादि संकल्पः॥ त्यागोपस्थानं कुर्यात्॥ तर्पणात्पूर्वं ब्रह्मय
ज्ञः॥ अथ वा त्यागदाने काले कार्यः॥ पितृणामपसव्यं॥ मनुष्याणां कंठलंबितं वस्त्रोत्तरं॥ स्ना
वित्रजानुनिपातलोपः॥ श्राद्धकाले प्राप्ते श्राद्धत्यागः कार्यः॥ प्रवासे क्रियमाणे प्रसंगेन तीर्थप्रा
प्तौ सत्यामामान्नेन श्राद्धं पिंडदानं कार्यं॥ आपद्यानुसारे मासषट्‌द्विषण्मासत्संवत्सरादूर्ध्वं पुनरा
धानं॥ तीर्थयात्रार्थे पुनराधानं॥ अर्थ यद्यर्थं दोषो नास्ति॥ पर्वण्यपि निपक्षनोऽनं॥ स्तकुइ

साचेदनधिकारिणी अशक्ता वा॥ तदा होमकर्त्ता स्यागदानं करोति॥५॥

क्षुविकारे पयोविकारे दोषा नास्ति॥ सकृत् अज्ञात अयाचित प्राप्तो गृहीत्वा भोजनं॥ अनि
घसंबंध्यवस्य भोक्तव्यं॥ अत्यंतापत्तौ स्वसत्तया पाकं कृत्वा भोक्तव्यं॥ अज्ञानात्पर्वणि पर
न्नभोजने एक प्राजापत्यः॥ कामतो प्राजापत्यत्रयं॥ नितरां त्यक्ते पर्वणि परान्नभोजने
पुनराधानं॥ प्रवासस्ते यजमाने सायं प्रातरग्निः॥ पक्षादिपिंडपितृयज्ञादि ऋत्विक् करोति
पत्नी संनिहिता सा स्यागदानं करोति॥ ऋत्विग्ना वे पत्नी होमं करोति॥ स्वकुमारी वा॥ प्रवासे
पिंडाघ्राणलोपः॥ पुनराधानप्राप्तौ सत्यां मण्यियजमानगमनपर्यंतं सर्वकर्म कर्त्तव्यं॥ उदकू
प्रवासस्थयजमाने मृते सति अस्थ्या॥ गमनपर्यंतं कर्मलोपो नास्ति॥ सर्वकर्म कर्त्तव्यं॥ तस्यावसथ्याग्नि
नादाहः॥ पुत्रादेर्यावन्मरणवार्त्ता न श्रुता तावत्संध्यादिकर्मलोपो नास्ति॥ मरणश्रवणसमयानंतरं अ
स्थ्यागमे सेनावागमे वा दाहादिकर्त्तव्यं॥ चेत्संनिहितैस्तद्देशे मरणं तदा त्वावसथ्येव दाहः॥ शवाभावे त्व
कृत्वा उक्तकृच्छ्रप्रायश्चित्तं कृत्वा दाहः॥ तेषामप्यलाभे पालाशवृन्तैः षष्ठ्यधिके
स्थिभिः॥ शरीरकल्पनं कृत्वा दाहः॥ नारायणबलि सद्भावे नारायणबलिं कृत्वा आव
शेतत्रयसंख्याकैः शरीरकल्पनं कृत्वा दाहः॥ दाहदिनादारभ्य दशाहमाशौचं पुत्रादेः त्रिपक्षिकपर्यंतं दाहदिने श्राद्धं॥
सथ्याग्निनापक्वादाहः॥ 47

अग्निहोत्रिणः त्रैपक्षिकादूर्ध्वं मरणादिने श्राद्धं ॥ अथ पुनराधाननिमित्तानि कथ्यंते ॥ पतिः प्र
वासंगतः कथंचित्पत्न्यपि प्रवासं करोति तदा पुनराधानं ॥ सायंहोमातिक्रमे उदयात्पूर्वमपि क
र्तव्यं ॥ यद्युदयस्यात्तदा गृहपतावागमने पुनराधानं ॥ होमादिक्रियालोपो नास्ति ॥ पत्न्येसंनि
हिते सति पत्नी ग्रामांतरं गच्छेत्तदा पुनराधानं ॥ तथा समुद्रगातिक्रमे पुनराधानं ॥ यद्यग्न्यसं
संनिहितः पतिः पत्नी वा तदा इतरस्य सीमातिक्रमे कालातिक्रमे च समुद्रगातिक्रमे पुनराधानं ॥
सर्वदः पत्न्याः प्रवासनिषेधो विद्वूरं विना ॥ विद्वूरे त्वेकाकिन्यप्यग्निमादाय गच्छेत् ॥ यजमानोऽग्निस
मीपे न विद्यते ॥ सा चेदेकाकिनी च गच्छति तदा पुनराधानं ॥ अग्निं त्यक्त्वा दंपत्योः सीमातिक्र
मे वपनादिनवतरं पुनः राधानं ॥ सायंहोमानंतरं दंपत्योः प्रवासे कृते तस्य यदि द्योजाते
पुनराधानं ॥ दंपत्योः अग्निं गृहीत्वा गमने प्रारब्धे समुद्रगाप्रवाहे अथवा आद्यसीमातिक्र
मे दंपत्योः अनन्वारंभे पुनराधानं ॥ अग्नौ शांते सति मंथाने क्रियमाणे ग्न्यनुत्पत्तौ अस्तमा
ने जाते उदयास्तमये जाते पुनराधानं ॥ इदानीं प्रतिषिद्धपाके कृते उदकादिना शामने अशुभ
त्रपुरीषादिसंसर्गे अंत्यजादिस्पर्शे प्रतिनिमित्तं पुनराधानं ॥ मंथने क्रियमाणे यंत्रचालने कृते

अरणीस्थस्याग्नेः शमने सति पुनराधानं ॥ अथ पुनराधानस्वरूपं कथ्यते ॥ ॥ सर्वत्र पुनराधाने
प्राणायामत्रयं तिथ्यादि ॥ पश्चाद्धानिमित्तं पुनराधानं तं निमित्तमुच्चार्य पुनराधानमहं करिष्ये ॥ ततो
वैकल्पिकपदार्थविधारणं ॥ अरणिमानेन निर्देशः पूजनं ॥ स्वीकारः ध्रुवस्थापरिलेखः पंचभूःसंस्का
रः मंथनं ॥ स्थापनं ॥ रूप्यादि स्मरणं देवतान्निध्यानं ॥ ब्रह्मोपवेशनादि ब्राह्मणभोजनपर्यंतं स
मानं ॥ ईदृशं पुनराधानस्वरूपं ॥ यदि विवाहानंतरं करोति तदा आभ्युदयिकं पूर्वकमाधानं
दारकालवत् ॥ येन केन विप्रुरूपेण दारकाले दायाद्यकाले वा आधानं कृ तं प्रायश्चित्ते स्त्री कृत्यका
लांतरे वा आधानं कृतं पश्चाद्द्वितीयो विवाहः ॥ कृतः सापि सहाधिकारिणी कृता ॥ ज्येष्ठा मृता तदा
गृह्याग्निना दाहः कार्यः ॥ द्वितीया भार्या सहाधिकारिणी तया सह पुनराधानं कर्तव्यं ॥ तदा प्रथमाभ्यु
दयिकमेव ॥ सा चेत्पूर्वमभिकृता ॥ तदा प्रथमाधानवदाधानं ॥ कनिष्ठा अधिकृता वा ॥ मृता तस्या ॥ ४८
ग्निर्न दातव्यः ॥ श्रवणाकर्मणोपक्रमे कृते सति ज्येष्ठा मृता तदा भार्यांतरं यद्यस्ति तया सह पु
नः क्रिया ॥ आग्रहायणीकर्मणि कृते ज्येष्ठा मृता तदा नावृत्तिः ॥ अष्टकावत्तु ष एव मध्ये भार्या
मरणो द्वितीयया भार्यया सह पुनः क्रिया ॥ न पुनः श्रवणाकर्मादि पुनः क्रिया ॥ अधिकारिणी

कनिष्ठान्नवतिनतदा एकादश्यां रात्रिनिवृत्तौ पुनराधानपूर्वकमुद्दिष्टकर्मक्रिया कार्या।। श्रवणा
कर्मोपक्रमेसति।। अग्नौ वा दिपन्नौ सायंप्रातर्होमो बलिदानमप्सगोत्रेकारयितव्यं।। पिंडयज्ञेश्व
रूपस्व।। आग्नौ वरतो दर्शनादिना इडयज्ञातिक्रमेजाते तदा शुद्ध्यनंतरं कर्तव्यं।। आग्रहायणीपर्य
तमयमेवन्यायः।। एवं प्रथमाष्टका क्रिया आरब्धा। द्वितीयाष्टकादि कार्यं।। सर्वत्र आरंभामुख्यका
ळेकर्तव्यः।। न गौणकाले।। आरंभे नित्यहोमपक्षादि पिंडपितृयज्ञेषु पत्न्यातिक्रमेण न क्रियते।। य
दि रोगग्रस्ता अथवा दुष्टआनायुक्ता सती कर्मसंनिहिता न भवति तदा कर्मवैगुण्यं नास्ति।। प्रथमव
र्षश्रवणाकर्मारंभो न घटते तदा अनादिष्टपूर्वकं कर्मारंभः।। इडयज्ञादौ पृथगनादिष्टं नास्ति।।
सर्वत्र गौणप्राप्तेऽनादिष्टमिति वचनात्।। एवमष्टकाविषये पक्षादि पिंडयज्ञादर्शश्राद्धमपरप
क्षिकश्रवणाकर्मादिप्रलोपप्रत्येकमुपवासः।। गर्भाधानादिसंस्कारलोपे प्रत्येकमेकः प्राजा
पत्यः।। गर्भोत्पत्तिपर्यंतं संस्कारादिक्रमेण एकमेवाभ्युदयिकं कृत्वा गर्भाधानपुंसवनसीमंतो
न्नयनं क्रियते गर्भोत्पत्तेः प्राक् सीमंतोन्नयनं न कृतं तत्संगे बालकं गृहीत्वा एकादशादि
वसे सीमंतोन्नयनमात्रं।। सीमंतोन्नयनं जातकर्म नामधेयं एतेषामतिक्रमे एकमेवाभ्युद

यिकं कृत्वा यथाक्रमेण कर्तव्यानि॥ जातकर्मनामाद्युपनयनपर्यंतं एकमेवाभ्युदयिकं कृत्वा
कर्तव्यं॥ सर्वत्राग्निस्थापनानंतरमेकमेवानांदीश्राद्धं॥ कालांतरे जातकर्मणि क्रियमाणे मेधाज
ननस्तनप्रदानसर्षपहोमउदपात्रस्थापनानि तेषामेव भावः॥ स्त्रीदृग्गृहमध्ये उदपात्रस्था
49 पनं च भवति॥ जातकर्मलोपे जातेसति कालांतरे कर्तव्यं॥ कुतः यतो गर्भसंस्कारः कृतदाभ्युद
यिके पाकः कार्यः॥ अग्नौकरणहोमस्त्वावसथ्ये ग्नौ संस्कारकर्म लौकिकाग्नौ सर्वेषु पुत्रसं
स्कारेष्वेव॥ उपाकर्मांग समिदाधानमप्याप्यमानोयत्रिष्याः सगुरोरूपासनाग्नौ करोति॥
सीमंतादीनि गर्भसंस्कारकर्माणि लौकिके॥ सूतकाग्निर्लौकिक एव॥ सूतिसंबंधि सर्वं लौकिका
ग्नौ क्रियते॥ पर्वणि पाकस्तथैव॥ सूतिकसंबंधिपंचयादि कर्म तल्लौकिके न॥ पर्वण्ययदि यत
त्पाक्तिमश्रीयान्नैव दोष नाशः॥ केशांतपर्यंतं पिताऽस्वाधिकारेण नांदीश्राद्धं करोति॥ स्नानादेषु ४९
त्राधिकारी कर्माणि॥ प्रथमविवाहपर्यंतं नांदीश्राद्धे पितैवाधिकारी॥ प्रेतकार्यसंबंधि लौकिका
ग्नौ पुत्रो यद्यावसथ्याग्निमान् तदावसथ्याग्नौ सपिंडीकरणपाकः॥ अग्नौकरणहोमश्चका
र्यः॥ पंचमहायज्ञानपृथक्पाकेन कुर्वीत॥ अरणिखंडमात्रे विद्यमानेऽपि अरण्यंतरोपादानं कार्यं॥

उत्तरायाअपि क्षयेजातेअधरारणेर्वो नरो ग्राह्यः॥ अधरायास्त्वंत क्षये जातेसति
अग्निधारण परमयत्नेन कार्यः॥ तत्रन्हतने अरणीसन्नद्धौ आनीय॥ अयंतद्
तितयोः समारोपं कृत्वा ज्ञातेग्नौ तत्र मंथनं॥ ततः स्थापनं॥ अकृत समारोपस्य घ्
ग्निः शांन्यति तदा पुनराधानं॥ एवं दाहे॥ अपहारे च पुनराधानं॥ अग्नेः अरण्या
वा अंत्यजातिस्पर्शे रतोविण्मूत्रादिसंसर्गे सति संभवे पुनराधानं॥ असंभवे पुन
स्त्वेति समिंधनं॥ नवेणायज्ञियकाष्ठप्रक्षेपः॥ अरण्योः क्षालनं॥ तच्चूर्णां वपात्राणा
मुपहतौ क्षालनं तच्चूर्णां पादस्पृष्टे लंघिते वापात्रक्षालनमेव॥ अरण्योस्तु तक्ष
णक्षणमेव॥ ७॥ मासचतुष्टयमध्ये गर्भस्रावे जाते स्त्रिया एव त्रिरात्रमाशौचं॥
पंचमे षष्ठे पातः॥ मास समं स्त्रियाः पित्रादि सपिंडानां दिनत्रयं॥ सप्तमादारभ्य
दशरात्रं सर्वेषां जीवमाने जाते नालच्छेदनात्पूर्वं मृते मातुर्दशरात्रं॥ नालछेदना
दनंतरं स्नातनामकरणात्पूर्वं सर्वेषां॥ नामकरणादनंतरं दंतजननात्पूर्वं

पत्नीहोमस्तु तत्र क्वासमारूढे कथं चन॥ पंचयज्ञविधानं च लौकिकेग्नौ विधीयते॥१॥ दारासापद्भवचत्र
न्याद्वात्रिषु सर्वदा॥ तथान्यास्वपि चापत्सु पत्नीहोमो विधीयते॥२॥

एकरात्रं॥ दंतजननादनंतरं उपनयनपर्यंतं त्रिरात्रं॥ कन्यामरणे चूडापर्यंतं तावद्दिसं
ध्या॥ चूडानंतरं वाग्दानपर्यंतं एकरात्रं॥ कन्यायाः मातापित्रोरन्येषां च त्रिरात्रं॥ वा
ग्दानानंतरं विवाहपर्यंतं कन्यासंबंधित्रिपुरुषमाशौचं॥ वाग्दानानंतरं पितृ
पक्षे विवाहानंतरं भर्तृपक्षे॥ सर्वसपिंडानां त्रिरात्रं॥ विवाहानंतरं पितृगृह
मरणे प्रवासे॥ कर्मादिषु न नियमः॥ तत्र प्रकृतमंडपेषु श्रवणा॥ कर्मतावदुच्य
ते॥ तत्र प्रथमप्रयोगे पूर्वाह्णे निर्णेजनांते विश्वेदेविकं रूचाऽभ्युदयिकं श्रा
द्धं कुर्वीत॥ तत्र यजमान उपविश्य प्राणानायम्य देशकालौ संकीर्त्य गोत्रपितृ
नामसंकीर्त्य॥ श्रवणा॥४॥ अथ साग्निकस्य प्रवासादौ परागिनिपक्वेनाऽन्न ॥५०॥
विषयविचारो लिख्यते॥ वात्रुष्प्रारपड्डान्नदादिकं कुर्यादार्विज्येक्रियमा
णासुल्याविहितत्वातड्डूहस्य॥ ववनादन्यत्र साग्निकस्य परागिनिपक्केनाऽन्नेनि
निषेधः॥ तथाच परिशिष्टेशौनकवचनं च॥ परागिनिपक्केनान्नीयात्रगुडगोर

असामर्थ्येशारीरस्यनहुङ्व्याध्यभावतः॥ स्वसत्तयापरेद्दत्तंमन्त्रीयास्त्रोषितोऽग्निमान्॥ १॥
प्रोषितेनैकस्मिन्स्वकंकर्महूयाचमन्यथाविधिः॥ संकल्पपूर्वंबेल्यागास्तान्कुर्यात्तिंचयहिकान्॥ २॥
समंतरा॥ आहिताग्नेरयंधर्मोयाहिकानांचसंमतिः॥ आपस्तंबपरिशिष्टे॥ अन्यग्निपक्वंनाश्नीया
द्विनाचगुडगोरसं॥ शाकपिण्याकसक्त्वादीन्वानमघ्यात्पलादिकं॥ तथावाथर्वणपरिशिष्टे॥ इ
होर्विकारान्शाकंचफलमूलघृतंपयः॥ सक्तुचूर्णांश्चचूर्णानिक्रोडंचखदिरंतथा॥ वर्ज्जयित्वा
त्रभुंजंतिपराग्निपचितंतुये॥ तेसाग्निकादुराचाराजायंतेब्रह्मराक्षसाः॥ पचंतियेलौकिका
ग्नावग्नानाद्वालस्यसंभवात्॥ विदेशेवास्वदेशेवाभोजनायनराधमाः॥ दिग्भ्रान्तेगेप्रवासेवा
व्याधितेव्यसनेथवा॥ अन्यस्मिन्केनविकार्येभोजनायनरोधमाः॥ दर्शेवापौर्णमासेवा
पराग्निपाकसेवनात्॥ पाकसेवामातापित्रोरविनकेसाद्रेत्रिरात्रं॥ प्रवासेचैकरात्रं॥ ॥॥
॥ ॥ इतिमघइविद्याविशारदगंगाधरसूनुदिवाकरविरचितायांप्रयोगपद्धतौपाकयज्ञसहितगृ
ह्याग्न्याधानपद्धतिःसमाप्ता॥ ॥ ॥ संवत् १६५३ समये मार्गशिरवदि १ तद्दिने लिखितं॥
विश्वनाथोऽ

५१ सं०

४५

धर्मविद्वास्ताः शूद्रा क्रियार्थं याचते धनं॥ जायते प्रेतचांडालः शूद्रार्थं न्यस्य देवता॥१॥ यज्ञार्थं भिक्षि
तं द्रव्यं यस्सर्वं नोपयाजयेत्॥ स काकयोनौ जायेत सहस्रं कल्पदुर्मतिः॥२॥ उपादाय धनं शूद्राद्वह्नि
होत्रमुपसते॥ शूद्राग्निहोत्री स ज्ञेयो ब्रह्मवादिषु गर्हितः॥३॥ ये शूद्राद्धिगम्यार्थमग्निहोत्रमुपा
सते॥ स द्विजस्तो हि शूद्राणां ब्रह्मवादिगर्हितः॥४॥ अधर्मेणार्जितं द्रव्यं यः क्रियास्तूपयोजयेत्
पापात्मा नरकं गच्छेद्यस्यार्थे तस्य तत्फलं॥५॥

१५००

स्मार्त गंगाधरी
पाकपधती
१५००

॥५१॥

51

33